Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वर्णमधु

ಸ್ವರ್ಣಮಧು

(ಸಂಸ್ಕೃತ ಕಥಾ ಸಂಕಲನ)

संपादक :

प्रिन्सिपाल, विद्वान् एस्. पी. शिवशंकर्, एम. ए; बी-एड्.

सिद्धलिंगेश्वर वेद संस्कृत महापाठशाला

सिद्दगंग, तुमकूरु

S. Narayanan
I year P.U.C. "B" Section
Government Junior College
Nagamangala Mandy district

प्रकाशक :

बाल साहित्य भंडार

नं 2, के. बी. लेन्, अरळेपेट्, बेंगलोर्-53

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वर्णमधु

ಸ್ವರ್ಣಮಧು

(संस्कृत कथा संकलन)

*

S. Narayanan
I P.U.C. "B" Section
Government Junior College
Nagamangala

संपादक :

प्रिन्सिपाल, विद्वान् एस्. पी. शिवशंकर्, एम. ए; बी-एड्.

सिद्धलिंगेश्वर वेद संस्कृत महापाठशाला

सिद्दगंग, तुमकूरु

Narayanan

प्रकाशक :

बाल साहित्य भंडार

नं 2, के. बी. लेन्, अरळेपेट्, बेंगलोर्-53

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रथम मुद्रण : 1981

(Paper used for Printing of this book was made available by the Government of Karnataka at concessional rates)

सर्वस्वाम्य: सुरक्षित:

मुद्रक:—

रोहिणी प्रिन्टर्स

काटन्पेट्-बेंगलोर्—53.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्राक्कथनम्

कथानिबन्धाः मनोविनोदं नीति बोधनं च जनानां वितन्वन्ति। बाल-विद्यार्थिना स्वन्तं रञ्जयित्वा, नीतिं च अधिगत्य, यथाते संस्कृत भाषाज्ञान मभि-वर्धयेयुः तथात्र संकन्लने कृतप्रयत्ना वयम्। एताः कथाः उत्साहं, स्वामि भक्तिं, देशगौरवं, कष्टसहिष्णुतां कारुण्यं परोकपारादिकं च प्रोत्साहयन्ति।

"गद्यं कवीनां निकषंवदन्ति" इति सूक्तिः कवीनां गद्यं काव्य निर्माणं कियत् क्लेशकर मिति प्रकाशयति। संस्कृते गद्यकाव्यानि विरलानि। अत्रत्याः कथाः सुप्रसिद्धानां कवीनां कृतिभिरूद्धताः सन्तिः। आसु कथासु भाषाशैली सरला, कथाश्च रोचकाः सन्ति।

कथासु विषयवैविध्यं विराजते। मनसः व्याक्षेपः दूरीभवति; कार्यो-त्साहश्च जायते। अत्र पुटसंख्या पठ्यसूचिकानिर्देशानुसारेण नियन्त्रितास्ति।

अस्य पुस्तकस्य मुद्रणकार्ये सर्व विधेषु साहाय्यकर्तॄणां श्रीमान् एच. नारायणाचार्य वर्याणां, बेङ्गलूर अरलेपेट्रेस्थ बालसाहित्य भण्डार प्रकाशकोनांच मम कृतज्ञताः। तथा इदं पी. यू. सी प्रथम कक्ष्याया उपपठ्य पुस्तकत्वेन अङ्गीकृत-वतां पी. यू. सी. पाठ्यपुस्तक निर्देशनमण्डल्याधिकृतां सबहुमान धन्योक्ति व्याहरामः। अस्य कृतेः परिशोधनादि कार्ये साहाय्यकमनुष्ठितवतां विद्वान् मुळुकुण्टे M.N. लक्ष्मीनरसिंह भट्टानां उपकारः न विस्मरणीयः।

— संपादक

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विषय–सूची

1) स्वर्गङ्गा भुवमागता 1

2) वीरोचितमुपायनम् 5

3) स्वामि भक्तिः 10

4) करुणालयो जीमूतवाहनः 14

5) कर्णार्जुनसंग्रामः 24

6) विश्रुतचरितम् 31

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

१. स्वर्गङ्गा भुवमागता

पुरा सगरो नाम धर्मात्मा भूपतिरासीत्। तस्य द्वे भार्ये बभूवतुरेका विदर्भराजन्य दुहिता केशिनी नामापरा चारिष्टनेमेर्दुहिता सुपर्णभगिनी सुमतिर्नाम। सह ताभ्यां सगरो हिमवन्तमासाद्य भृगुप्रस्रवणे स्थानौ तपस्तेपे। पूर्णे वर्षशते तपसाऽऽराधितो मुनिर्भृगुः सगराय वरं प्राददात्। एका भार्या वंशवृद्धिकरं पुत्रं जनयिष्यति षष्टिं च पुत्रसहस्राण्यपरेति। एवं भाषमाणं तं राजपुत्र्यौ प्राञ्जली भूत्वोचतुः। एकः सुतः कस्या भविष्यति का च बहून्पुत्राञ्जनयिष्यतीति। परमधार्मिको भृगुर्बभाषे। अत्र स्वच्छन्दो विधीयतामिति। ततः केशिनी वंशकरं पुत्रं जग्राह सुमतिश्च षष्टिं पुत्रसहस्राणि वव्रे। ऋषिं प्रदक्षिणीकृत्य प्रीतो राजा सगरः सभार्यः स्वपुरं जगाम। गते काले ज्येष्ठा महिषी केशिनी पुत्रमेकं प्रासूतासमञ्ज इति ख्यातम्। सुमतेस्तु षष्टिः पुत्रसहस्राण्यजायन्त। महता कालेन ते सर्वे पुत्रा यौवनपदवीमारूढाः। सगरस्य ज्येष्ठः पुत्रोऽसमञ्जः पौराणां बालांगृहीत्वा सरय्वा जले प्रक्षिप्य मज्जतस्तान्निरीक्ष्य प्राहसत्। पापसमाचारः पौराणामहिते युक्तः स पौरवचनात् पित्रा नगरान्निर्वासितः। तस्यासमंजस्यांशुमान्नाम सर्वलोकस्य संमतः प्रियंवदो वीर्यवान्पुत्रः समजनि। ततः कालेन सगरो यष्टुमुपचक्रमे। अश्वरक्षां दृढधन्वा महारथोऽंशुमान्स्वयमकरोत्। वासवो राक्षसीं तनुमास्थाय यज्ञियमश्वमपाहरत्। अश्वे ह्रियमाणे यजमानमुपाध्याया अब्रुवन् अयं यज्ञियोऽश्वोनीयते, काकुत्स्थ हर्तारं हत्वाऽश्वमुपनय नो चेत्सर्वेषां नोऽशिवाय यज्ञच्छिद्रं भवेदिति। उपाध्यायवचः श्रुत्वा षष्टिं पुत्रसहस्राणि जगाद पुत्रागच्छत विचिनुध्वं यावत्तुरगसन्दर्शस्तावन्मेदिनीं खनत। अहं दीक्षितः पौत्रेणांशुमता सहेह स्थास्यामि यावत्तुरगं द्रक्ष्यामीति। ते सर्वेहृष्टमनसः पितुर्वचनाद्वज्रसमैर्भुजैः पृथ्वीं बिभिदुः। वसुधायां भिद्यमानायां वध्यमानानां नागानामसुराणां च महान्निनादोऽभवत्। एवं जम्बूद्वीपं खनन्तस्ते सर्वतः परिचक्रमुः। ततो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

देवाःसगन्धर्वपन्नगाः संभ्रान्तमनसः पितामहमुपागम्य विषण्णवदना ऊचुः । भगवन्, सर्वा पृथ्वी सगरात्मजैः खन्यते बहवश्च जलचारिणो महात्मानो वध्यन्ते । अयं यज्ञहरोऽस्माकमनेनऽश्वेनीत इति मे सगरात्मजाः सर्वभूतानि हिंसन्तीति । संत्रस्तेन देवतानां वचः श्रुत्वा भगवान्पितामह उवाच । यस्य वासुदेवस्येयं कृत्स्ना वसुधा महिषी स एव प्रभुः कापिलं रूपमास्थाय धरां धारयिष्यति तस्य कोपाग्निना च सगरात्मजा दग्धा भविष्यन्तीति । पितामहवचो निशम्य हृष्टा देवाः स्वंस्थानं जग्मुः । महीं भित्त्वा सगरपुत्राः पितरमेत्याब्रुवत । सर्वा मही परिक्रान्ता बलवन्तश्च यक्षासुरपन्नगा निषूदिता न त्वश्वं तद्धर्तारं वा पश्यामः किमत्र करिष्याम इति । समन्युः सगरः प्रत्युवाच भूयः पृथ्वीं खनत, अश्वस्य हर्तारमासाद्य कृतार्था निवर्तध्वमिति । पितुर्वचनं श्रुत्वा सर्वे पुत्रा रसातलमभ्यद्रवन् । खन्यमाने रसातले तैश्चतसृषु दिक्षु प्राच्याद्यासु विरूपाक्ष-महापद्म-सौमनस-भद्राख्या दिग्गजाः पृथ्वीधारणे नियुक्ता दृष्टाः । तान्प्रदक्षिणीकृत्य प्रागुत्तरां दिशं रोषेणाखनन् सगरपुत्राः । ततः कपिलरूपधारिणं सनातनं वासुदेवं तस्य नातिदूरे च चरन्तं हयं ददृशुः । तपश्चस्य हर्तारं मत्वा महता क्रोधेनाविष्टाः खनित्रलाङ्गलधरास्तमभ्यधावंस्तिष्ठ तिष्ठ त्वमस्माकं यज्ञियं तुरगं हृतवानसीति चाब्रुवन् । तेषां तद्वचनं श्रुत्वा कपिलो महता रोषेण हुंकारमकरोत् ते च तस्य रोषाग्निना भस्मराशीकृताः ।

पुत्रांश्चिरगताञ्ज्ञात्वा सगरः पौत्रमंशुमन्तमब्रवीत् । शूरः कृतविद्यः पूर्वैश्च तेजसा तुल्योऽसि । तस्मात्पितॄणां गतिमन्वेषय । अभिवाद्यनभिवाद्य विघ्नकारन्हत्वा च सिद्धार्थो निवर्तस्वेति । एवमुक्तेऽशुमान् धनुः खड्गं चादाय जगाम पितृभिः खातं च मार्गं प्रापद्यत । सर्वांदिग्गजान्सम्पूज्य पितॄन् वाजिनश्च हर्तारमुद्दिश्य पर्यपृच्छत् । तेऽब्रुवन् । त्वं कृतार्थः सह वाजिना शीघ्रं प्रत्यागमिष्यसीति । ततो भस्मराशीकृतान् पितृव्यांस्तेषामदूरे चरन्तं हयं च ददर्श । पितृव्याणां दशामालोक्य दुःखार्तोऽशुमांश्चुक्रोश तेषां च जलक्रियां कर्तुमियेष । कुत्रापि जलमलब्ध्वा यावन्निपुणं न्यरूपयत् तावत्खगाधिपं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पितॄणां मातुलं ददर्श । वैनतेयोंऽशुमन्तं जगाद । पुरुषव्याघ्र, मा शुचः, वधोऽयं लोकसंमतः । अप्रमेयेण कपिलेन यत इमे दग्धास्तस्माल्लौकिकं सलिलमेभ्यो दातुं नार्हसि । पितॄणां सलिलक्रियां हिमवतो ज्येष्ठायां दुहितरि गङ्गायां कुरु । लोकपावनी गङ्गाभस्मराशीकृतानिमांश्चेत्प्लावयेत्तर्हि सर्वे सगरपुत्राः स्वर्गं गच्छेयुः । अश्वं गृहीत्वा निर्गच्छ पितामहं यज्ञं च निर्वर्तयेति। सुपर्णवचनं श्रुत्वा त्वरितं हयमादायांशुमान्निर्जगाम । दीक्षितं राजानमासाद्य सर्वं तस्मै न्यवेदयत् । सगरो यज्ञं यथाविधि परिसमाप्य स्वपुरमगच्छत् । गङ्गावतरणोपाये निश्चयमगत्वा महता कालेन दिवं गतः ।

सगरे दिवं गतेऽंशुमान्राजा बभूव । तस्य पुत्रो दिलीपो नाम विश्रुतोऽभवत् । तस्मिन्राज्यधुरां न्यस्य हिमवच्छिखरेऽंशुमांस्तपस्तेपे स्वर्गं च लेभे । कथं गङ्गावतरणं कथं सगरपुत्राणां जलक्रिया कथं चैतांस्तारयेयमिति दिलीपोऽपि सगरपुत्राणामुद्धरणं प्रति निश्चयमगत्वा स्वर्लोकं ययौ । ततस्तस्य पुत्रो भगीरथो नाम परमधार्मिको मंत्रिषु राज्यमाधाय गङ्गावतरणे निश्चितमतिर्गोकर्णे वर्षसहस्राणि घोरं तपः समातिष्ठत् । ततः सुरगणै सार्धं पितामहो भगीरथमुपगम्याब्रवीत् । महाराज, तव तपसा प्रीतोऽहं तस्माद्वरं वरयेति । भगीरथ उवाच । यदि भगवान्प्रीतस्तर्हि सगरपुत्राणां भस्म गङ्गया प्लावितं भवतु । अहं च संततिं याच इति । पितामहो भगीरथं प्राह स्म । भगीरथ, महानेष मनोरथः । इमां हिमवतो ज्येष्ठां सुतां धारयितुं हरान्न कोऽप्यन्यः समर्थस्तस्माच्छूलिनमत्र नियूंक्ष्वेति । एवमुक्त्वा गङ्गां चाभाष्य परमेष्ठी सह देवैस्त्रिदिवं जगाम ।

गते पितामहे भगीरथोऽगुष्ठाग्रनिपीडितां वसुमतीं कृत्वा वत्सरं समुपास्तोमापतिम् । पूर्णे संवत्सरे शम्भुर्नृपमब्रवीत् । प्रीतोऽहं शिरसा शैलराजसुतां धारयिष्यामीति । ततो गङ्गाऽतिमहद्रूपमास्थाय नभस्तः शिवशिरसि महता वेगेन पपाताचिन्तयच्च शङ्करं गृहीत्वा स्रोतसा पातालं व्रजामीति । तस्या अवलेपं ज्ञात्वा क्रुद्धो हरस्तां तिरोभावयितुं मतिं चक्रे । रुद्रस्य मूर्धनि पतिता सा जटामण्डलान्निर्गमं नैवं लेभे तस्मिन्नेव जटामण्डले बहून्संवत्सरान्बभ्राम ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ततस्तप आस्थाय भगीरथः शङ्करमप्रीणयत् । स गङ्गां बिन्दुसरः प्रति विससर्ज । विसृज्यमानायां तस्यां सप्त स्रोतांसि जज्ञिरे । ह्लादिनी पावनी नलिनी चेति तिस्रो गङ्गाः प्राचीं दिशं सुचक्षुः सीता सिन्धुश्चेति तिस्रः प्रतीचीं दिशं जग्मुः । सप्तानां स्रोतसां सप्तमी दिव्यस्यन्दनमास्थितं भगीरथमन्वगच्छत् । गगनाच्छङ्कर शिरस्ततो धरणीमागता गङ्गा यजमानस्य जह्नोर्यज्ञवाटं संप्लावयामास । क्रुद्धो जन्हुर्गङ्गायाः सर्वं जलमपिबत् । ततो देवा गन्धर्वा ऋषयश्च जह्नुम-पूजयन्गङ्गां च तस्य दुहितृत्वेऽस्थापयन् । ततस्तुष्टो जह्नुः श्रोत्राभ्यां तामसृजत् । तस्माद्गङ्गा जन्हुसुता जाह्नवी चेति प्रोच्यते । पुनर्भगीरथरथमनुगच्छन्ती गङ्गा सागरं प्राप्य रसातलमुपागच्छत्सगरपुत्राणां च भस्म स्वेन पवित्रेण जलेनाप्लावयत् । गङ्गायाः सलिलेन भस्मन्याप्लुते सति ब्रह्मा भगीरथमुवाच । सगरस्य षष्टिः पुत्रसहस्राणि तारितानि । यावत्सागरस्य जलं लोके स्थास्यति तावत्सगरात्मजा देववद्दिवि स्थास्यंति । इयं च गङ्गा लोके तव नाम्ना विश्रुता भविष्यति भागीरथीति । पुरुषर्षभ. गङ्गावतरणं कृत्वा लोके परमं यशः प्राप्तोऽसीति । एवमुक्त्वा पितामहो देवलोकमगच्छत् । भगीरथो यथाक्रममुदकक्रियां कृत्वा स्वपुरं प्रविश्य राज्यं चिरं प्रशशास ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

२. वीरोचितमुपायनम्

अस्ति पूर्वाम्बुधितटे ताम्रलिप्तीति पुरी। तस्याञ्च चण्डसिंहो नाम राजाऽभूत्। यः परस्त्रीषु पराङ्मुखः परं सङ्ग्रामभूमिषु न; शत्रुसंघानां हन्ता, परद्रव्यसम्पदान्तु न। एकदा तस्य भूपतेः द्वारि दाक्षिणात्यः सत्त्वशीलो नाम जनप्रियः कश्चित् राजपुत्रः समभ्यगात्। तत्रागत्य स आत्मानम् आवेद्य नृपात् नैव काममवाप। ततश्च स यावत्—'यदि मे राजान्वये जन्म तदीदृशं निर्धनत्वं किम्? निर्धनत्वे च धात्रा किं मे महेच्छता विहिता? अयं हि राजा सेवमानमेवं क्लिष्टपरिच्छदं चिरं क्षुधा अवसीदन्तं मां नाद्यापि पश्यति, इति ध्यायति, तावत् स नृपः आखेटकार्थं निरगात्। अग्रे च तस्मिन् कार्पटिके राजपुत्रे लगुडवाहिनि धावति, राजा प्रसूताऽऽश्वपादातयुतः प्रायात्। तत्र च मृगान् समन्विष्यन् आरात् महान्तं शूकरमनुधावन् अतिदूरं वनान्तरं प्रापत्। तत्र पर्णतृणाच्छन्नमार्गतया शूकरं तमपश्यन् श्रान्तः स राजा तस्मिन् वनान्तरे दिङ्मोहमगमत्। एक एव स कार्पटिको राजपुत्रः प्राणानपेक्षी पदातिः क्षुत्तृत्तृषापरीतः वाताश्वपृष्ठगं तं राजानमनुससार। स राजा तं तथा अनुयान्तं दृष्ट्वा सस्नेहमवदत्,—"भद्र! कच्चित् यथागतं मार्गं वेत्सि?" तदाकर्ण्य स बद्धाञ्जलिः कार्पटिकोऽभ्यधात्—"देव! वेद्मि, परम् इह क्षणं विश्राम्यतु देवः, एष खलु दिवो बध्वा मेखलामध्यमणिः स्फुरद्रश्मिजालजिनीनायकोऽतितरां देदीप्यते"। एतदाकर्ण्य स राजा सनिर्बन्धं तमभाषत,—'तर्हि क्वापीह भवता पानीयं दृश्यताम्"। स च कार्पटिकः "तथा" इत्युक्त्वा तुङ्गं तरुमारुह्य समन्तात् पश्यन् नदीमेकां दृष्ट्वा अवरुह्य, तं नृपं तत्र निनाय। नीत्वा तदीयं वाहं विपर्य्याणीकृतं कृत्वा अम्बूनि शष्पाणि च दत्त्वा विगतश्रममकरोत्।

ततश्च स कृतस्नानाय राज्ञे वसनाञ्चलात् प्रोन्मुच्य आमलकानि फलानि प्रक्षाल्य तस्मै हृद्यानि उपानयत्। "एतानि कुतः प्राप्तानि?" इति पृच्छन्तं भूपतिं स कृताञ्जलिर्व्यजिज्ञपत्,—"देव! एतद्वृत्तिरहं नित्यं व्यतीतदशवत्सरः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

देवमाराधयन् अनैकान्तमुनिव्रतं चरामि ।" इति श्रुत्वा राजा, —"सत्त्वशील ! त्वं सत्यनामा. किमुच्यते ?" इति अभिधाय कृपाक्रांतः लज्जितश्चाचिन्तयत् ,—"धिक् नृपान्, ये भृत्येषु क्लिष्टमक्लिष्टं न जानन्ति, धिक् तत्परिवारान् ये प्रभुं तत्तत् न ज्ञापयंति" इति सञ्चिन्त्य स राजा द्वे आमलके कार्पटिकहस्तात् कथञ्चिदनुबन्धतः प्रतिजग्राह, विशश्राम च ते भुक्त्वा अम्बु च निपीय क्षणं तेन जग्धामलकपीतजलेन कार्पटिकेन सह । ततः तेन कार्पटिकेन सज्जीकृत वाहमारुह्य, तस्मिन्नग्रेसरे गच्छति मार्गदर्शिनि, राजाज्ञया हयस्य पश्चाद्भागासनस्थिते, स राजा पथि सम्प्राप्तसैनिकः स्वां पुरीं प्रयात् । तत्रागत्य तस्य कार्पटिकस्य भक्तिं प्रख्याप्य, वसुभिः कार्पटिकं पूरयित्वाऽपि निष्कृतिं नामन्यत । ततः सः कृतार्थः चण्डसिंहस्य भूपतेः पार्श्वचरः त्यक्तकार्पटिकाचारः सत्त्वशीलस्तस्थौ ।

एकदा राजा तं सत्त्वशीलं सिंहलेश्वरसुतामात्मार्थं याचितुं सिंहलद्वीपं प्रैषयत् । ततश्च स गच्छन् अभीष्टदेवतामर्चयित्वा राजादिष्टैः द्विजैः सह पोतमारुरोह । तस्मिंश्च पोते मध्यमागशङ्किनं गते, सहसा तस्मात् जलधेः अभ्रंलिहाग्रः सुमहान् जाम्बूनदविनिर्मितः विचित्रवर्णविचलद्वैजयन्तीविभूषितः गजः विस्मयं जनयन् उत्तस्थौ । तस्मिंश्च काले समुन्नद्धघनावली सहसा भृशं वर्षितुमारेभे, तीव्रो मारुतश्च ववौ, द्विपः वर्षवातैर्बलादाकृष्य अधोरणैरिव तस्मिन् पोतध्वजस्तम्भे आमज्यत ; तावच्च तस्मिन् वीचिविप्लुते वारिधौ स गजस्तेन वहनेन सम मज्जितुं प्रावर्त्तत । ततस्ते द्विजाः तत्रस्थाश्चण्डसेनं स्वभूपतिमुद्दिश्य भयार्त्ताः अब्रह्मण्यमुदघोषयन् । तदाकर्ण्य स सत्त्वशीलः स्वामिभयक्तयतिशयात् असहिष्णुः निस्त्रिंशहस्तः बद्धोत्तरीयकः अनुध्वजमात्मानं निरपेक्षः वारणाशङ्की उदधेः प्रतिविधित्सया प्राक्षिपत् ।

अथ तस्मिन् मग्ने, वातोर्मिभिर्दूराक्षिप्तं तत् वहनमभज्यत, तत्स्थाश्च सर्वे यादसां मुखे निपेतुः । स च सत्त्वशीलोऽम्बुधौ मग्नो यावत् निरीक्षते स्म, तावत्तत्र दिव्यं पुरं ददर्श, न वारिधिम् । तत्र मणिमयस्तम्भभास्वरे हेममन्दिरे सद्भिः रत्नैर्बद्धसोपानवापीके उद्यानशालिनि नानामणिशिलाभित्तिरत्नचित्रोच्छितध्वजं मेरु-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रोन्नतं कात्यायनीमंदिरं प्रविश्य, तां तत्रस्थां देवीं प्रणम्य स्तुत्वा अभ्यर्च्य च तदग्रतः "किमेतदिन्द्रजालम् ?" इति सविस्मयमुपाविशत्। तावच्च काऽपि दिव्या इन्दीवराक्षी चन्द्रवदना कुसुमस्मिता मृणालमृदुकलेवरा स्त्रीसहस्रपरिवारा सहसा काटमुद्घाट्य देवीगर्भगृहं सत्वशीलस्य च हृदयं समं विवेश। सा च तत्र देवीमभ्यर्च्य तस्मात् गर्भगृहात् निरगात् न पुनः सत्वशीलस्य हृदयात्, प्राविशच्च तत्रैव प्रभामण्डलकान्तारे। सत्वशीलोऽपि तामनुजगाम। ददर्श च अन्यत् उत्तमं सर्वासां भोगसम्पदां सङ्केतोद्यानमिव भवनम्। तत्रान्तर्मणिपर्य्यङ्कनिषण्णां तां विलोक्य समुपेत्य तत्पार्श्वे समुपाविशत्, आसीच्च तन्मुखासक्तलोचनो लिखित इव।

इत्थं सोत्कण्ठपुलकाङ्गर्वदनाऽऽलोकनोत्सुकं तं स्मराऽऽविष्टं दृष्ट्वा काऽपि तदीया चेटी तदिङ्गितज्ञा तमब्रवीत्,—"भद्र! अतिथिस्त्वमिह प्राप्तः, तदस्मत्स्वामिन्या कृतम् आतिथ्यं भजस्व, उत्तिष्ठ, स्नाहि, भुङ्क्ष्व"। ततश्च च आशां कथञ्चित तदुक्तितः सम्प्राप्य तया दर्शितामेकामुद्यानवापीमगात्, उदतिष्ठच्च तस्यां निमग्नस्तत्क्षणं ताम्रलिप्त्यां चण्डसिंहस्य नृपतेर्वापीमध्यात्। तत्राकस्मात् प्राप्तमात्मानं वीक्ष्य सोऽचिन्तयत्,—"अहो! किमेतत्? क्व तदुद्यानं दिव्यम्? क्व च तत्र अमृतसारमयं तस्या दर्शनम्? क्व चानन्तरमेव तद्विश्लेषमहाविषमिदम्? स्वप्नोऽयं न, विनिद्रोऽहं, ननु तया चेटया अहं विप्रलब्धः विमूढोऽस्मि" इति चिन्तयन् तां कन्यां विना सोन्माद इव तस्मिन्नुद्याने भ्रमन् कामार्त्तो विललाप। तदवस्थञ्च पिशङ्गैः पुष्परेणुभिर्वोद्धतैर्वियोगानलैरिव परीताङ्गं तं दृष्ट्वा उद्यानपालः चण्डसिंहं महीपतिं गत्वा व्यजिज्ञपत्। स च तदाकर्ण्य उद्भ्रान्तः स्वयमेत्य तं ददर्श, पप्रच्छ च सान्त्वयन्,—"किमिदं ब्रूहि सखे! त्वं क्व प्रस्थितः? क्व च प्राप्तः? क्व आस्थाः? क्व च पतितः इति। तदाकर्ण्य स तस्मै सर्वं वृत्तान्तम् अशंसत्। राजा व्यचिन्तयत्,.... "हन्त! वीरोऽयं मदर्थं कामेनैवं विडंबितः, तदिदानीमस्याऽऽनृण्यं लब्धुमयमवसरो मया प्राप्तः" इति चिन्तयित्वा स राजा तं जगाद,—"सखे! मुधा शोकं मुञ्च, त्वां तेनैव मार्गेण नीत्वा तामसुरकन्यकां प्रापयामि" इति उक्त्वा स्नानादिना तं समाश्वासयत्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अथान्येद्युः सः मंत्रिविन्यस्तराज्यभारः तेन समं पोताऽऽरूढः तद्दर्शितेन अम्बुधिमार्गेण गच्छन् तन्मध्यभागे प्राग्वत् समुत्थितं सपताकं गजं ददर्श। तदवलोक्य सत्त्वशीलो राजानमभ्यधात्;—"देव! सोऽयं दिव्यप्रभावो महागजः समुत्थितः, मयि अत्र मग्ने देवेनानुध्वजं मज्जनीयम्" इत्युक्त्वा अस्य निमज्जतो ध्वजस्य निकटं प्राप्य स सत्त्वशीलः पूर्वमात्मानं तत्र न्यक्षिपत्; ततो राजाऽपि तमनु आत्मानं निचिक्षेप। अंतर्मग्नौ च तौ तत्र तद् दिव्यं पुरमापतुः। तच्च दृष्ट्वा राजा सविस्मयो देवीं तां पार्वतीं प्रणम्य सत्त्वशीलेन सममुपाविशत्। तावच्च तत्र सा कन्या सखीजनसमन्विता रूपिणी प्रभेव ततः प्रभामण्डलकान्तारात् निर्गात्।

"इयं सा सुमुखी" इति सत्त्वशीले वदति, स राजा तस्यामस्यानुरागो युक्त इत्यमन्यत। साऽपि तं राजानं दिव्यशारीरलक्षणं वीक्ष्याचिन्तयत्,—"कोऽयमपूर्वः पुरुषातिशयः?" विवेश च अविकापूजार्थं तन्मंदिरम्। सोऽपि नृपः तं सत्त्वशीलमादाय अवज्ञां प्रदर्शयन् उद्यानमाजगाम। क्षणेन च सा कन्यका कृतदेवीपूजा तस्या देव्याः सत्पतिलाभं याचित्वा तद्गृहाभ्यन्तरात् निर्गत्य सखीमेकां प्राब्रवीत्,—"सखि! क्वासौ वीक्ष्यतां यो मया इह दृष्टः, स महात्मा कथं तिष्ठति? युष्माभिर्विचित्य "आतिथ्यमेत्य गृह्यतां, प्रसादो मे त्वया क्रियताम्" इत्येवम् अभ्यर्थनीयः, स हि पूज्य कोऽपि उत्तमः पुमान्"। एवं तयोक्ता सखी तं विचित्य उद्यानवर्त्तिनं स्वस्वामिनीनिदेशं प्रह्वा व्यजिज्ञपत्। तदाकर्ण्य स वीरो नृपः सावज्ञं तामुवाच,—"भद्रे! वयमेव कृतमातिथ्यं, नान्यत् किमपि उपयुज्यते"। एतदाकर्ण्य तया सख्या गत्वा सा असुरनन्दिनी श्राविता। तदा उदारं तमसामान्यं कमपि अभ्यमन्यत। ततस्तेन मानुषायोग्येऽपि आतिथ्ये निःस्पृहेण राज्ञा धैर्य्यपाशेनाकृष्यमाणा पत्यर्थं पार्वतीसेवापरिपाक—समन्विता दैत्यकन्यका स्वयमुपेत्य उद्यानं प्राविशत्, प्राविश्य च राजानं तमभ्येत्य प्रश्रयान्विता आतिथ्यग्रहणार्थं प्रायायामास।

ततः स नृपस्तं सत्त्वशीलम् उद्दिश्य तामुवाच—"भद्रे! अनेन कथितां देवीमिह द्रष्टुमहमागतः, दृष्टा च सा गौरी परमाद्भुतकेतनं ध्वजपथं प्राप्य,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तदनु त्वञ्च"। तदाकर्ण्य सा कन्यका प्रत्यभाषत —"राजन्! तर्हि कौतुकात् त्रिजगदद्भुतं पुरं वीक्षितुमागम्यताम्। एवंवादिनीं तां स नृपः विप्रयावदत्—"तदपि अनेन मे कथितं, यत्र सा स्नानवापी अस्ति" इति। कन्यकाऽवादीत्—"देव! मैवमादिश, नाहं विडम्बनशीला, पूज्ये विडम्बना का? विशेषतस्त्वहं युष्माकं सत्वोत्कर्षेण किङ्करीकृताऽस्मि, तन्मम प्रार्थनाभङ्गं मा कुरुष्व' एतदाकर्ण्य स राजा सन्त्वशीलेन सहितः "तथा" इत्युक्त्वा तया सह प्रभामण्डलोपान्तं ययौ।

अथ अपावृतकवाटे तस्मिन् प्रविष्टः अपरं दिव्यं नित्यं सर्वर्तुकुसुम-फलाशोभितं रत्नकाञ्चनैर्निर्मितमपरं मेरुपृष्ठमिव पुरं ददर्श। तत्र सा महार्हे रत्नासने राजानमुपवेश्य यथोचितं अर्घ्यादिकमानाय्य राजसुताऽब्रवीत्,—"महाभाग! अहमस्मि असुरेन्द्रस्य महात्मनः कालनेमेः सुता, चक्रिणा स मम पिता स्वर्गं प्रापितः; इदञ्च मे पैतृकं पुरद्वयं विश्वकर्मणा कृतं, सर्वकामदे अत्र न जरा न च मृत्युः बाधते। इदानीञ्च त्वं मे पिता सपुरायाः"। इति समर्पितात्मसर्वस्वां तामवादीत् सा राजा—"यदि एतत्, तर्हि त्वं मम सुता अस्मै सत्त्वशीलाय सुहृदे वीराय बान्धवाय च मया दत्ता"। एवं देवीप्रसादेन मूर्त्तेनेव नृपेण स उक्ता गुणज्ञा विनता तं राजानं "तथा" इति अन्वमन्यत।

ततस्तस्याः पाणिग्रहं कृत्वा कृतार्थे तस्मिन् सत्त्वशीले, राजा असुरैश्वर्य्यं सर्वं दत्वा तं सत्त्वशीलमुवाच—"सखे! भुक्तयोरामलकयोरेकमद्य मया तव संशोधितम्, असंशोधितात् द्वितीयाद् तेऽहं ऋणी तिष्ठामि" इति प्रणतं तमुक्त्वा, तां दैत्यपुत्रीमब्रवीत्,—"भद्रे! मार्गो मम दर्श्यतां, येन स्वां पुरीं प्राप्नुयाम्" इति। ततः सा अपराजितं नाम खड्गम् एकञ्च जन्मजरामृत्युहरं फलं दैत्यनंदिनी तस्मै भूपाय प्रादात्। अथ स राजा ताभ्यां खड्गफलाभ्यामन्वितः तयोक्तायां तस्यामेव वाप्यां मग्नः स्वदेशतः समुत्थाय सर्वकार्य्यसिद्धिमानभूत्। स च सत्त्वशीलः दैत्यस्त्रीपुरराज्यं सुखेन शशास"।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

३. स्वामि भक्तिः

अस्ति कस्मिंश्चिद्भागे शोभावती नामार्थवती नगरी। तस्यां च शूद्रको नाम कश्चित्प्राज्यविक्रमो नृपतिर्बभूव। कदाचित्तं महीपालं प्रियशूरं मालवेभ्यः कश्चिद्वीरवरो नाम द्विजः समुपययौ। तस्य धर्मवती नाम भार्या, सत्त्ववरो नाम सुतः, वीरवती नाम कन्या चेति त्रयं गृहपरिच्छदः। तावन्मात्रपरिवारो वीरवरस्तस्माद्राज्ञः प्रत्यहं दीनारशतपञ्चकं वृत्तये प्रार्थयामास। शूद्रकोऽपि वीक्ष्य तमाकारसूचितोदारपौरुषं यथेप्सितं तस्मै ददौ। अल्पे परिकरेऽप्यमियद्भिर्दीनारैः किं व्यसनं पुष्णाति, उताहो सञ्चयं करोतीति जिज्ञासमानो राजा तस्य पृष्ठतः प्रच्छन्नांश्चारान्स्थापयामास। वीरवरः प्रातर्भूपदर्शनं कृत्वा तस्य द्वार आमध्याह्नं स्थित्वा स्ववृत्तिलब्धानां दीनाराणां मध्याच्छतं प्रत्यहं स्वभार्याया हस्ते भोजनार्थं प्रादात्। एकेन शतेन वस्त्राङ्गरागताम्बूलं क्रीणाति स्म। शतेन विष्णोः शिवस्य च पूजां व्यधात्। शतद्वयं दीनेभ्यो विप्रेभ्यश्च ददौ॥ एवं पञ्चापि शतानि नित्यं विभेजे। ततोऽग्निकार्यादि कृत्वा भुक्त्वा च राजद्वारमगच्छत्। एकाकी च निशि पाणौ करवालं दधत् सिंहद्वारे तस्थौ। एतां तस्य नित्यचर्यां चारमुखाच्छ्रुत्वा शूद्रकोऽत्यर्थं तुतोष। तस्यानुमार्गगांश्चारान्निवारयामास तं च विशेषपूजार्हममन्यत। यातेषु दिवसेषु घोरमेघौघे दिवानिशं प्रवर्षति वीरवरः सिंहद्वारे तथैवाचल आसीत्। तं तथा दिवा दृष्ट्वा राजा तस्य स्थितिं जिज्ञासुः पुनर्निशि सौधस्याग्रमारुरोह। ततो जगाद च। को नु सिंहद्वारे स्थितोऽत्रेति। देवाहं स्थितोऽत्रेती वीरवरः प्रत्युवाच। दृढसत्त्वोऽयं वीरवरो मयि परां भक्तिमास्थितः तदेष मया महत्पदं प्रापणीय इति शूद्रकोऽचिन्तयत्। अन्येद्युश्च तमसा सर्वासु दिक्षुश्च मलिनीकृतासु राजा तथैवोवाच वीरवरश्चाहं स्थित इति पुनः प्रत्युवाच। तस्य धैर्यं दृष्ट्वा यावद्राजा विस्मयते तावद्दूरे विषादविकलाया रुदत्याः स्त्रिया रोदनं शुश्राव।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कैषाऽबला निश्येकाकिनी रोदितीति जिज्ञासमानो जातकरुणश्च राजाऽवः स्थित वीरवरमादिदेश । भो वीरवर, शृणु. एषा कापि स्त्री दूरे रोदिति, कासौ किमर्थं च रोदिति तद्गत्वा त्वया निरूपणीयमिति । तथेत्युक्त्वा वीरवरो निबद्धासिः मेघान्धकारमगणयित्वा प्रस्थित एकाक्येव । तादृश्यां रात्रौ प्रस्थितमेकाकिनं तं दृष्ट्वा राजाऽपि करुणा-कौतुकाविष्टः प्रासादपृष्ठतोऽवतीर्य गृहीतासिस्तस्य पृष्ठतोऽनुपलक्षितः प्रतस्थे । रुदितानुसृतिक्रियया गत्वा वीरवरो नगराद्बहिः सरः प्राप्य तत्र ददर्शैकां स्त्रियं शोचन्तीं हा शूर, हा कृपालो, हा त्यागिन्, त्वया विरहिताऽहं कथं वत्स्या मीति । साश्चर्यो वीरवरस्तां पप्रच्छ । का त्वं किं रोदिषीति । साभ्यधात् । भो वीरवर, मां वसुधां जानीहि । अधुना धार्मिकः शूद्रको मम पतिः । तृतीये च दिने स राजाऽपुण्यै प्रजानाममरेषु गणितो भविष्यति । तादृशमन्यं नृपं कुतः पतिं प्राप्स्यामीत्यतोऽहं शोचामीति । व्यथितो वीरवरोऽब्रवीत् । अस्ति कश्चिदुपायो येनास्य जगन्मणेर्मृत्युः परिहृतो भवेदिति । सा देवी जगाद । अस्त्येक उपायो भक्तानेव तु तं कुर्तृं समर्थ इति । ततो वीरवरोऽवदत् । द्रुतं वद यावत्तमुपायमाशु साधयाम्यन्यथा कोऽर्थो मम प्राणैरिति । देवी वसुध बभाषे । वीरवर, त्वत्समः स्वामिभक्तः कोऽन्योस्ति । उपायं शृणु । यैषा राजकुलस्यांतिके राज्ञा कृतप्रतिष्ठा चंडिका देवी वर्तते तस्यै स्वपुत्रं सत्त्ववरं यद्युपहारीकरिष्यसि तदा नैष राजा मृत्योर्वश गमिष्यति, अन्यत्स-ा माशतं च जीविष्यतीति । वीरवरो देव्या वचो निशम्योवाच । यामि देवि, करोम्येतदधुनैवेति । ततो भद्रं तवेत्युक्त्वा वसुधा तिरोदधे । एतं वृत्तान्तं गूढचारी नृपोऽशृणोत् । ततो वीरवरो गूढेन राज्ञा शूद्रकेणानुगम्यमानः स्वगृहं ययौ । तत्र पत्नीं प्रबोध्य यद्देव्योक्तं तत्सर्वं तस्यै निवेदितवान् । सोवाच—नाथ, प्रभोर्वृत्तिप्रदस्य शुभं कार्यम् । तस्मात्सुतं प्रबोध्यैतत्तस्मै कथयितुमर्हसीति । सुतं सत्त्ववरं नाम सुतं प्रबोध्य सर्वं वृत्तान्तं तस्माआख्याय वीरवरोऽब्रवीत्- त्वयि देव्या उपहारे कृते राजा जीवति नो चेत्तृतीयेऽहनि विपद्यत इति । एतच्छ्रुत्वैव स बालः स्व नाम यथार्थं दर्श

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यन्नव्याकुलचित्तः पितरं व्याजहार तात, मम प्राणैश्चेद्राजा जीवति कृतार्थोऽहं स्याम्। भुक्तस्य तदन्नस्य मया निष्कृतिर्दत्ता स्यात्। तत्किं विलम्बसे भगवत्याः सन्निधौ मां नीत्वोपहारीकुरु। मृतेन मया प्रभोः शान्तिरस्त्विति। एवं सत्त्ववरेण प्रोक्तो वीरवर उवाच। साधु, पुत्र साधु, सत्यं मत्तः प्रसूतोऽसीति। वीरवरमन्वागतो राजा सर्वमेतद्बहिः स्थितः श्रुत्वा सविस्मय मवदत्! अहो सर्वेषामेषां समं सत्त्वमिति। ततो वीरवरः स्कन्धे पुत्रं कृत्वा भार्यया धर्मवत्या सुतया वीरवत्या चानुगम्यमानो रात्रौ चण्डिकागृहं पुनरेयाय। राजा शूद्रकोऽपि च्छन्नस्तत्पृष्ठतो जगाम। स्कन्धात्पित्राऽवतारितः स सत्त्ववरो देवीं नत्वा सधैर्यं व्यजिज्ञपत्। देवि, मन्मूर्धोपहारेण राजा शूद्रकोऽन्यद्वर्षशतं जीवतु राज्यमकण्टकं च करोत्विति। एवमुक्तवतः सूनोः सत्त्ववरस्य शिरः साधु साध्वित्युदीर्य च्छित्वा वीरवरस्तद्देव्यै ददौ। साधु वीरवर येन त्वया सत्पुत्रमेकं निघ्नता राज्ञे शूद्रकाय प्राणा दत्ताः, सत्य तव समोऽन्यः स्वामिभक्तो नास्तीति तत्क्षणमन्तरिक्षादुदगाद्भारती। वीरवरात्मजा वीरवती हतस्य भ्रातुर्मूर्धानमुपेत्याश्लिष्य विलपन्ती हृत्स्फोटेन व्यपद्यत। ततो वीरवरं भार्याऽब्रवीत्। राज्ञस्तावच्छ्रेयः कृतं तस्मादिदानीं वदामि। यत्र निर्ज्ञानाऽपि बालिका भ्रातृशोकेन मृता तत्रापत्यद्वयवधदह्यमानेन जीवितेन को मेऽर्थः। अपत्यकलेवराभ्यां सहाहमनलं प्रविशामीति। एवं निर्बन्धेन वदन्तीं तां वीरवर उवाच। 'एवं कुरुष्व मनस्विनि, अपत्यदुःखैकमये जीविते का ते प्रीतिः। किं मयैवात्मा देव्यै नोपहारीकृत इति व्यथा तव मनसि मा भूत्। प्रतीक्षस्व यावत्ते चितां रचयामि"। इत्युक्त्वा दारुभिश्चितां रचयित्वाऽपत्यशवद्वयं तत्रास्था स्थापयित्वा प्रज्वलयामास। ततो धर्मवती भर्तुः पादयोः पतित्वा देवीं प्रणम्य तां विज्ञापयामास। अयमेवार्यपुत्रो जन्मांतरे मम पतिर्भूयादिति। इत्युदीर्यैव सा साध्वी तस्मिन् ज्वालाकलापजटिले चितानले चिक्षेपात्मानम्। ततो वीरवरश्चिन्तयामास। राजकार्यं मया निष्पादितम्। प्रभोरानृण्यं गतोऽहम्। सकलं कुटुम्बकं प्रभोः कृते व्ययीकृत्य ममैकस्य जीवितेन किं प्रयोजनम्। तत्किमात्मोपहारेणांबिकां न प्रीणयामीत्यालोच्य स दैवीमस्तौत्।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जय महिषासुरमारिणि दारिणि रुरुदानवस्य शूलकरे ।
जय विबुधोत्सवकारिणि धारिणि भुवनत्रयस्य मातृवरे ॥
जय कालि जय कपालिनि जय कङ्कालिनि शिवे नमस्तेऽस्तु ।
शूद्रकनृपंतेरधुना प्रसीद मन्मस्तकोपहारेण ।

इति देवीं स्तुत्वा वीरवरः स्वोत्तमाङ्गमच्छिनत् । एतदालोक्य प्रच्छन्नः शूद्रकः सदुःखः साश्चर्यश्च व्यचिन्तयत् । अनेन साधुनाभक्तेऽन्यत्राश्रुत-मदृष्टं किमपि दुष्करं कर्म कृतम् । विविधाश्चर्यमयेऽस्मिन संसारे कुत ईदृशो धीरो नरः सम्भवेद्यः प्रभोः कृते स्वासूननुक्त्वैव ददाति । अस्योप-कारस्य सदृशं यदि नाहं कुर्यां तर्हि का मे प्रभुता किं च मे पशोरिव जडजीवितेनेति । एवं सञ्चिन्त्य कोशात् खड्गमाकृष्य शूद्रको देवीमुपेत्य व्यजिज्ञपत् । भगवति सदैव त्वामनुप्रपन्ने मूर्धोपहारेण मयि कुर्वनुग्रहम् । अयं विप्रो वीरवरो यथार्थनामा मदर्थे त्यक्तजीवितः सकुटुम्बः पुनरुत्तिष्ठ-त्विति । एवमुदीर्य यावद्राजाऽसिना शिरश्छेत्तुं प्रावर्तत तावदशरीरिणी वागुदचरत् । मा साहसं कृथाः सत्त्वेनानेनाहं तुष्टास्मि । सापत्यदारो वीरवरः प्रत्युज्जीवतीति । ततो वीरवरः सापत्यदार उदतिष्ठत् । तदद्भुतं विलोक्य राजा पुनः प्रच्छन्नोऽभवत् । वीरवरोऽपि सुप्तोत्थितमिवात्मानं दृष्ट्वा पुत्रदारं च पुनः सजीवं वीक्ष्य विभ्रान्तमानसः पृच्छन्नामग्राहं सर्वान् पप्रच्छ । भस्मीभूताः कथं यूयं पुनर्जीवन्त उत्थिताः । मयापि शिरश्छिन्नं तथापि जीवाम्येव । किं न्विदं स्यात् । स्वप्नो नु, माया नु, उताहो मतिविभ्रमोऽयमाहोस्विद्देव्यनुग्रह इति । स दारापत्यैरूचे । यद्वयं जीवामो देव्यनुग्रह एवायम् । न स्वप्नो न चापि विभ्रम इति । ततो वीरवरोऽ-ग्निकां नत्वा गृहं ययौ । तत्र पुत्रं पुत्रिकां भार्यां च स्थापयित्वा पुनः सिंहद्वारमायातः । शूद्रकोऽपि केनाप्यलक्षितः प्रासादपृष्ठमारुरोह व्याहरच्च कोऽत्र द्वारि स्थित इति । ततो वीरवरोऽवदत् । अहमत्र तिष्ठामि । देवादेशान्नियं यावद्गच्छामि तावत्सा राक्षसी मां हन्त्वैव नष्टेति । राजा

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विस्मितः प्रोवाच। अहो मनस्विनश्चित्तस्य समुद्रगम्भीरता यदयं कृत्वाप्यनन्यसाधारणमवदातं कर्म न प्रकाशं ब्रूत इति। प्रातः स भूपतिर्मन्त्रिभ्यो रात्रिगतं वृत्तान्तमकथयत्। तेन च ते साश्चर्या अभवन्। तस्मै वीरवराय कर्णाटयुतं लाटदेशराज्यं ददौ। ततो वीरवरशूद्रकौ तुल्यविभवावन्योन्योपकारिणौ चिरं राज्यसुखमन्वभवताम्॥

---

४. करुणालयो जीमूतवाहनः

अस्ति हिमवान् नाम सर्वरत्नभूमिर्नगेन्द्रः, यो हि गौरीगङ्गयोः हरभार्य्ययोस्तुल्यप्रभवः, यश्च कुलभूभृताम् अग्रणीः सूर्य्येणाप्यदृष्टपृष्ठदेशः अभिमानोन्नतः सर्वत्र गीयते। तस्य सानोरुपरि काञ्चनपुरं नाम पुरं रविणा न्यासीकृतं रश्मिवृंदमिव विभाति। तत्र जीमूतकेतुरिति श्रीमान् विद्याधरपतिः पुरंदर इव मेरौ समध्युवास। तस्य गृहोद्याने कुलक्रमाऽऽगतः कल्पतरुः स्थितः। स राजा जीमूतकेतुः तं देवस्वरूपं कल्पतरुमाराध्य तत्प्रसादात् जातिस्मरं बोधिसत्त्वांशसम्भवं दानवीरं महासत्त्वं सर्वभूतानुकंपिनं गुरुशुश्रूषणपरं जीमूतवाहनं नाम पुत्रं प्राप।

कालेन सम्प्राप्तयौवनं तं स राजा सद्भिस्तद्गुणैः सचिवैश्च प्रेरितः यौवराज्ये अभिषिक्तवान्। कदाचित् यौवराज्यस्थितः स जीमूतवाहनः हितैषिभिः पितृमंत्रिभिरुपेत्य जगदे,—"युवराज! योऽयं कल्पतरुः सर्वकामदः सर्वभूतानामघृष्यश्च तवोद्याने तिष्ठति, अयं तव सदा पूज्यः, अस्मिन् अनुकूले स्थिते शक्रोऽपि नास्मान् बाधितुं शक्नुयात्, किमुतापरः?" एतदाकर्ण्य स जीमूतवाहनः अन्तरचिन्तयत्,—"अहो बत! ईदृशममरपादपं प्राप्यापि पूर्वैः पुरुषैरस्माकं तादृशं फलं किमपि नासादितं, केवलं कैश्चिदपि कृपणैस्तैः कश्चिदपि अर्थमर्थितः, तेन चात्मा च महात्मा चैषः उभौ

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

लाघवं नीतौ, तदहमस्मात् मनोरथमभीष्टं साधयामि" इत्यालोच्य स महात्मा पितुरंतिकमाजगाम। आगत्य च विहिताशेषशुश्रूषया परितोषितं सुखमासीनं पितरमेकान्ते व्यजिज्ञपत्—"तात! त्वमेव जानसि यदेतस्मिन् संसार—सागरे आशरीरमिदं सर्वं धनं वीचिविभ्रमचञ्चलं विशेषेण अचिरस्थायिनी प्रकाशपलायिनी सन्ध्याविद्युदिव चला लक्ष्मीः न कुत्रापि कदाऽपि स्थिरा, एकः परोपकार एवास्मिन् संसारे अनश्वरः युगान्तशतसाक्षिणी धर्मयशसी प्रसूते। तात! तत् क्षणिकेषु एषु सर्वेषु अस्माभिरीदृशः कल्पतरुः किमर्थं रक्ष्यते? यैश्चा पूर्वैरयं 'मम मम' इति आग्रहेण रक्षितः, तैरिदानीं कुत्र गतम्? तेषां कस्यायम्? अस्य वा ते के? तस्मात् परोपकारैकफलसिद्धये त्वदाज्ञया इमं कामदं कल्पपादपम् आराधयामि"।

अथ पित्रा "तथा" इति अभ्यनुज्ञातः स जीमूतवाहनः कल्पतरुं गत्व उवाच,—"देव,! त्वया असत्पूर्वं मामभीष्टाः कामाः पूरिताः, तन्ममैकमनन्यं कामं परिपूरय, यथा पृथ्वीमदरिद्रां पश्यामि, तथा करोतु देवः। भद्रमस्तु ते, व्रज, लोकाय अर्थिने त्वं मया दत्तोऽसि"। इतिवादिनी कृताञ्जलौ जीमूतवाहने "त्यक्तस्त्वया एषोऽहं यातोऽस्मि" इति वाक् तस्मात्तरोरुदभूत्। क्षणेन च स कल्पतरुः दिवः समुत्पत्य भुवि तथा वसूनि अवर्षत्, यथा न कोऽपि दुर्गत आसीत्। ततस्तस्य तया सर्वजीवानुकम्पया त्रैलोक्ये यशः पप्रथे।

अथ तद्गोत्रजाः सर्वे मत्सर्य्यात् असहिष्णवः कल्पपादपरहितं तं जीमूतवाहनं सपितृकं सुजयं मत्वा सम्भूय च तस्य राज्यापहरणाय समनह्यन्त। तदवलोक्य जीमूतवाहनः पितरमवादीत्—"तात! धृतायुधेन त्वया योद्धुं कस्य शक्तिरस्ति? किन्तु अस्य पापस्य विनाशिनः शरीरस्य कृते बन्धून् हत्वा कोऽकृपणो राज्यमाकङ्क्षति? तत् किं नो राज्येन? अन्यत्र क्वचित् गत्वा वयं धर्ममेव आचरिष्यामः, येन लोकयोरुभयोः सद्गतिः स्यात्। कृपणा पते दायादा राज्यलोलुपा मोदन्ताम्"। इतिवादिनं तं जीमूतकेतुरब्रवीत्,—"पुत्र! अहं त्वदर्थं राज्यमिच्छामि, त्वञ्चेत् कृपया

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तत् जहासि, तदा वृद्धस्य मे तेन किम् ?" । इत्थं कृताभ्यनुज्ञेन पित्रा मात्रा च समन्वितः स जीमूतवाहनः राज्यं विहाय मलयाचलमगात्, तत्र स रचिताऽऽश्रमः पितरौ शुश्रूषमाणस्तस्थौ ।

एकदा स इतस्ततो भ्रमन् विश्वावसुनाम्नः सिद्धराजस्य तत्र निवासिनः पुत्रं मित्रावसुं नाम दृष्ट्वा सम्भाष्य च मित्रम् अकरोत् । ततश्चैकदा स जीमूतवाहनः उपवने स्थितं देव्या गौर्य्या आयतनं दृष्ट्वा प्रविवेश, ददर्श च तत्र उपवीणयन्तीं, सखीजनपरिवृतां, शैलबालाऽऽराधनार्थं स्थितां, कामपि कन्यकाम् । तया च दृष्टया तन्व्या स जीमूतवाहनः सद्यः दृष्टिमार्गप्रविष्टया मुषितचित्तोऽभूत् । साऽपि तं भूपितोद्यानम् दृष्ट्वा अनुरागाविवशा तथा विह्वस्ततां भेजे, यथा सखीनां व्याकुलतामभात् । ततः स जीमूतवाहनस्तस्याः सखीम-पृच्छत्, 'भद्रे ! तव सख्याः किं धन्यं नाम ? को वा वंशोऽनया अलंकृतः' तदाकर्ण्य सखी प्राब्रवीत्,—'महाभाग ! इयं हि नाम्ना मलयवती, मित्रावसोः स्वसा. सिद्धराजस्य दुहिता" । एवमुक्त्वा सा सखी सहृदया तं जीमूतवाहनं, सहाऽऽगतं मुनिपुत्रं अस्य नामान्वयौ पृष्ट्वा तां मलयवतीं स्मितमिताक्षरम अवादीत्—"सखि ! विद्याधरेन्द्रस्यास्य किमातिथ्यं न करोषि ? जगत्पूज्य एषः अतिथिः प्राप्तः" । इति तयोक्ते सा सिद्ध-राजसुता तूष्णीं लज्जाऽवनता अभूत् । ततः सखी,—"लज्जावतीयं मत्तोऽर्घ्यं गृह्यताम्" इतिवादिनी तस्मै सार्घ्यां मालामुपानयत् । स च जीमूतवाहनः प्रेमनिर्भरः तां मालामादाय तस्या मलयवत्याः कण्ठे समर्पयत् । साऽपि तिर्य्यक्प्रसृतया स्निग्धया दृशा नीलोत्पलमयीमिव मालां तस्मै प्रत्यार्पयत् । इत्येवम् अन्योन्यकृताशब्दस्वयंवरयोस्तयोः एकां सिद्धराजसुतां काऽपि चेटी समागत्य जगाद,—'राजपुत्रि ! जननी त्वां स्मरति, शीघ्र-मागच्छ" । तदाकर्ण्य सा कृच्छ्रेण गृहमगात्, जीमूतवाहनोऽपि तद्गताऽऽत्मा स्वमाश्रमत्यासीम । अथ सा प्राणेशविरहाऽऽतुरा स्वां जननी दृष्ट्वा शयनीयं गत्वा आशु तत्र पपात ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अथ सा अश्रूणि प्रमुञ्चन्ती, शयने सख्या अङ्के भूतले च न शर्म लेभे। ततश्च वासरे रक्तया सन्ध्यया सह क्वापि गते, जीवितस्पृहाशून्या दूतीसम्प्रेषणादिकं लज्जया कर्त्तुं नाशकत् निनाय च कुच्छ्रेण निशाम्। जीमूतवाहनोऽपि तद्वियोगाऽऽर्त्तः शयनस्थोऽपि कामस्य हस्ते पतितः नूतनोद्भिन्नरागोऽपि प्रोन्मिषत्पाण्डुरकांतिः, लज्जामूकोऽपि कामजां पीडां वदन् निशामनैषीत्, प्रातश्चोत्थाय नितान्तमुत्सुकः तदेव गौर्य्यां मंदिरमगात्। तत्र तेन सख्या मुनिपुत्रेण पृष्ठत आगत्य यावदसौ समाश्वास्यते, तावत् मदनानलविह्वला सा मलयवती विरहासहा एकाकिनी गृहान्निर्गत्य गुप्तं प्राणत्यगाय तत्र निर्जने समायात्। सा पादपान्तरितं कान्तमलक्षयन्ती उदश्रुलोचना देवीं गौरी व्यजिज्ञपत्,—"देवि! तव प्रसादात् अस्मिन् जन्मनि यदि मया जीमूतवाहनः पतिः न लब्धः, तदा अन्यस्मिन्नपि जन्मनि यथा स एव मे पतिर्भूयात्, तथा प्रसादः क्रियताम्।" इत्युक्त्वा सा स्वोत्तरीयेण तत्क्षणम् अशोकतरुशाखायां, तस्या एव देव्या अग्रतः "हा नाथ! जीमूतवाहन! विश्वविख्यातकरुणेनापि त्वया कथमस्मि न परित्राता!" इत्युक्त्वा यावत् गले पाशं नियच्छति, तावत् इयमशरीरिणी भारती अन्तरिक्षात् समुदभूत्;—"पुत्रि! मा साहसं कार्षीः भाविविद्याधरचक्रवर्ती जीमूतवाहनस्ते पतिर्भविष्यति"। इति दैवीवाचमकर्ण्य सवयस्यः जीमूतवाहनः हृष्टां तः प्रियामुपाजगाम। "एष ते देव्या वरः प्रदत्तः सत्यमेव" इति तन्मित्रे मुनिपुत्रे तां बालां जल्पति, जीमूतवाहनस्तत्तत् पेशलं ब्रुवन् स्वहस्तेनैव तस्यां कण्ठात् पाशममोचयत्।

ततोऽकस्मात् तत्र पुष्पाणि चिन्वती काऽपि सखी तं व्यापारमवलोकयंती हृष्टा समेत्य तां सव्रीडया दृशा भुवं लिखन्तीं जगाद, 'सखि! दिष्ट्या वर्द्धसे अभीष्टसिद्धितः। अद्यैव महाराजो विश्वावसुस्ते पिता मम सन्निधौ कुमारेण मित्रावसुना विज्ञप्तः—'तात जगन्मान्यः कल्पतरुप्रदः योऽयं विद्याधरेन्द्रतनयो जीमूतवाहन इहाऽऽगतः, सः अतिथित्वेन नः पूज्यः तादृशश्चान्यो वरः न

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

दृश्यते, तस्मादसौ मलयवत्या कन्यारत्नेन पूज्यताम्।' 'तथा' इति राज्ञा श्रद्धिते, भ्राता ते मित्रावसुः अस्य महाभागस्य आश्रममद्यैव गतः। मन्ये, सद्य एव ते विवाहो भविता, तत् त्वं मन्दिरमागच्छ, एष च महाभागः स्वामाश्रमं यातु"। इति तया सख्या अभिहिता सा शनैः प्रहृष्टा समुत्सुका च प्रायात्। जीमूतवाहनोऽपि शीघ्रमाश्रममाजगाम।

आगत्य च मित्रावसोः यथाऽभीष्टं कार्य्यं श्रुत्वा अभिनन्द्य च स्वां जातिं पूर्ववृत्तान्तञ्च तस्मै समाचचक्षे। ततो मित्रावसुः प्रीतः परितुष्टयोस्तत्पित्रोरावेद्य गत्वा स्वगृहं पितरौ तद्वार्त्तावर्णनेन समनन्दयत्, अनयच्च तस्मिन्नेव दिने स्वं गृहं जीमूतवाहनम्। ततश्च यथायथं महोत्सवं विधाय, तत्रैव शुभे दिवसे तस्य विद्याधरेन्द्रस्य मलयवत्याश्च विवाहविधिं निरवर्त्तयत्। ततो जीमूतवाहनः सिद्धमनोरथः तथा नवोढया मलयवत्या सह तत्रैव कियन्तं कालं तस्थौ।

एकदा कौतुकाक्षिप्तचितः स मित्रावसुना सह मलयाद्रिं भ्राम्यन् समुद्रवेलामाससाद। तत्र अस्थिसंघातान् पतितान् दृष्ट्वा स तं मित्रावसुं "केषामेते अस्थिसंघाः प्राणिनाम्?" इति पप्रच्छ। ततः श्यालको मित्रावसुः तं कारुणिकमब्रवीत्,—"सखे! शृणु, अत्र वृत्तान्तं संक्षेपेण ते कथयामि,—

पुरा नागमाता कद्रुः तार्क्ष्यमातरं सपत्नीं विनतां सकपटपणनिर्जितां दासीतामनैषीत्। तेनैव वैरेण तार्क्ष्यस्तां मातरं दास्यान्मोचयित्वाऽपि बलात् नागान् कद्रुपुत्रान् सदा पातालं प्रविश्य भक्षयितुं कांश्चित् जघान, कांश्चित् ममर्द चाइत्थं क्रमेण सर्वनागेषु व्यापन्नेषु सर्वक्षयमाशंक्य नागराट् वासुकिः प्रार्थनापूर्वं तार्क्ष्येण समयं व्यधात्,—"खगेन्द्र! एकमेकं नागं ते आहारार्थं प्रत्यहं प्रेषयामि अत्र दक्षिणोदधेः पुलिने, त्वया तु पुनः कदाचन पातालं न प्रवेष्टव्यं, सर्वेषु नागेषु एकपदे निहतेषु तव कः स्वार्थः?"। इति नागराजेनोक्ते स गरुडः स्वार्थदर्शी 'तथा' इति प्रत्यपद्यत। तदा प्रभृति दिने दिने असौ

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गरुत्मान् वासुकिप्रेपितमेकैक नागम् अस्मिन् अर्बुधेः पुलिने भुङ्क्ते एते, च तेषां भक्ष्यमाणानां नागानामस्थिसञ्चयाः कालक्रमात् गिरिशृङ्गनिभाः समपद्यन्त" ।

इति मित्रावसोर्मुखादुपश्रुत्य सान्तर्दुःखः स जीमूतवाहनः निजगाद, "सखे ! शोच्यः स राजा वासुकिः, यः स्वहस्तेन स्वाः प्रजा विद्विषे उपहारीकरोति । स क्लीवः धृताऽऽननसहस्रोऽपि एकेन आननेनापि,— 'मामग्रतः भुङ्क्ष्व गरुत्मन् !' इति भाषितुं नाशकत् ? कथं वा निःसत्त्वः स्वकुलक्ष्ये तार्क्ष्यमभ्यर्थयामास ? कथं वा तार्क्ष्यः कश्य पसुतो वीरः कृष्णावाहनः ईदृंश पापं कुरुते ? अहो ! मोहस्य प्रागल्भ्यम् !!" । इति उक्त्वा "असारेण देहेन अद्य एकस्यापि नागस्य जीवितरक्षणं कुर्य्याम्" इति मनसि सङ्कल्प्य स्थिते तस्मिन् महासत्त्वे जीमूतवाहने, मित्रावसोः पितुराज्ञया कश्चीत् पतीहारः तयोराह्वानार्थमाजगाम । स तु जीमूतवाहनः, —"व्रज त्वमग्रतः, अहं पश्चात् यास्यामि" इति तं मित्रावसुं विसृज्य स्वयं तत्रास्थात् । तस्मिंश्च गते जीमूतवाहनः तत्र वाञ्छितार्थोन्मुखो भ्रमन् दूरात् करुणं रुदितमशृणोत् । गत्वा च कियद्दूरम् उत्तुङ्गशिला-तलसमीपगं एकं दुःखितं युवानं सुन्दराकृतिं राजभटेनेव पुंसा आनीय तत्क्षणं त्यक्तं, रुदतीं वृद्धां मातरं सानुनयं निवर्त्तयन्तं पुरुषमद्राक्षीत् ।

अथ 'कोऽयम् ?" इति जिज्ञासुः स यावदत्र करुणार्द्रचेताः छन्नः शृण्वन् जीमूवाहनस्तिष्ठति स्म, तावत् सा वृद्धा दुःखभागतिपीडिता स्त्री युवानं तम् अनुशोचितुं प्रावर्त्तत,—"हा शंखचूड ! हा दुःखशत-लालित ! हा गुणिन् ! हा कुलैकतन्तो ! पुत्र ! क्वाहं त्वां पुनर्द्रक्ष्यामि ? वत्स ! त्वन्मुखचन्द्रे गते स तव पिता शोकान्धकारपतितः वृद्धः कथं जीविष्यति ? अर्ककरस्पर्शादपि यत्तव अङ्गं दूयेत, कथं तत् तार्क्ष्यभक्षणजां रुजां सोढुं शक्ष्यति ? विस्तीर्णनागलोकेऽपि विधात्रा नागाधिपेन च अभव्याया मे एकसुतस्त्वं विचित्य किं लब्धः ?" । इति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विलपन्तीं तां स युवा तनयः प्राब्रवीत्—"मातः ! दुःखार्त्तमपि मां किं भृशं दुःखयासि ? गृहानेव निवर्त्तस्व, एष ते पश्चिमः, प्रणामः, आगमन-वेला चेयं गरुत्मतः" । तदाकर्ण्य—'हा ! हन्ताऽस्मि, को मे पुत्रमिह पास्यति" इति सा वृद्धा दिक्षु प्रक्षिप्ताऽऽर्त्तलोचना भृशं चक्रन्द ।

एतत् सर्वमाकर्ण्य बोधिसत्त्वांशसम्भवः स जीमूतवाहनो दृष्ट्वा च सर्वं गाढकरुणो व्यचिन्तयत्—"हन्त ! अयं शङ्खचूडो नाम नागः वासुकिना आहाराय तार्क्ष्याय प्रहितः, इयाञ्चस्य जनती स्नेहेनान्वागता एकसुता चेयं दुःखिसी नितान्तमार्ता विलपति तदेनमेवमार्त्तम् एकान्तनाशिना देहेन यदि न रक्षामि साम्प्रतं, तन्मे निष्फलं जन्म धिक् ! " इत्यालोच्य मुदा समुपगम्य जीमूतवाहनः वृद्धां तामुवाच,—" नागमातः ! अहं ते पुत्रं रक्षामि, मा रुद इति श्रुत्वा सा वृद्धा गरुडशङ्किनी सन्त्रस्ता,—" तार्क्ष्यः ! मां भुङ्क्ष्व " इति जगाद । शंखचूडः प्राब्रवीत् ,—" मातः ! नैषः तार्क्ष्यः मा त्रासं कार्षीः क्वायं चन्द्र इव अन्तरिन्द्रियमाह्लादयति । क्व चासौ तार्क्ष्यः भयमुत्पादयिति " इति शंखचूडेनोक्ते जीमूतवाहनोऽब्रवोत्—" अम्ब ! अहं विद्याधरः ते सुतं रक्षितुमायातः स्वमेतत् शरीरं वस्त्रच्छन्नं गरुत्मते क्षुधिताय दास्यामि, त्वमेतं सुतं नीत्वा गृहं व्रज" । तदाकर्य वृद्धा अवदत्,—"मा मैवं, त्वं मम अधिकः पुत्रः, यस्य ईदृशेषु अस्मासु ईदृशी कृपालुता" । एतदाकर्ण्य स जीमूतवाहनः पुनरवोत्,—"मातः ! न त्वमस्य मे मनोरथस्य भङ्गं कर्त्तुं अर्हसि आग्रहेण एवं ब्रुवन्तं तं शंखचूडः अवादीत्,—"महासत्त्व ! त्वया सत्यं कृपालुता दर्शिता, नाहन्तु त्वच्छरीरेण स्वशरीरं रक्षितुमिच्छामि, रत्नव्ययेन को हि पाषाणं रक्षति ! मादृशैः स्वमात्रानुकम्पिभिर्विश्वम् अपूर्ण, येषां जगदनुकम्प्य तादृशा भवादृशा अतिविरलाः । हे साधो ! अहं कलङ्कः शशिबिम्बमिव शंखपालकुलं शुचि कलङ्कयितुं न च शक्ष्यामि" इति तं प्रतिषिध्यैव शंखचूडः मातरं पुनर्जगाद,—" अम्ब ! अस्मात् कान्तारात् निवर्त्तस्व, अत्रैतत् नागानाम-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

सृग्भिरुक्षितं कृतान्तलीलापर्य्यन्तरौद्रं बध्यशिलरतलं किंन पश्यसि ? अहमिदानीम् अन्धितटं गत्वा गोकर्णाऽऽख्यमीश्वरं नत्वा द्रुतमागच्छामि, यावत् तर्क्ष्यो नागच्छति" इत्युक्त्वा मातरम् आपृच्छ्य च स शंखचूडो गोकर्णप्रणामार्थमगात् ।

"अस्मिंश्चेत् समये तार्क्ष्य आगच्छेत्, तदा मे मनोरथः सिद्धः स्यात्" इति जीमूतवाहनो, यावत् मनस्य करेत् तावत् आसन्नपक्षीन्द्रस्य पक्षपवनान्दोलितात् निवारणपरानिव तरून् वीक्ष्य गरुडाऽऽगमनवेलेयमिति मत्वा जीमूतवाहनः परार्थप्राण दित्सया तां बाध्यशिलामारुरोह । आरूढमेव तं महासत्त्वं गरुडः सहसा निपत्य तस्मात् शिलातलात् चञ्चूत्वा जहार, जवाच्च स्रुतशोणितधारम् उत्वातशिरोरत्नं तं नीत्व मलयाद्रेः शृङ्गे भक्षयितुमारेभे । एवमेव प्रतिजन्म मे परार्थो देदः स्यात्, परोपकृतिरहितौ स्वर्गमोक्षौ मा भूताम्" इति तार्क्ष्येण भक्ष्यमाणस्य तस्यानुध्यायतः विद्याधरेन्द्रस्य योपरि नभस्तलात् पुष्पवृष्टिः पपात ।

अत्रान्तरे रक्तधाराक्तशिरोमणिः तत्पत्न्या मलयवत्या पुरोऽपतत् । तत् चूडारत्नं दृष्ट्वा सुविह्वला श्वशुरयोरंतिकस्था सारं ताभ्यामदर्शयत् । तौ च दम्पती सूनोस्तं चूडामणिं विलोक्य सहसा "किमेतत् ?" इति सम्भ्रान्तौ बभूवतुः । ततः स्वविद्याऽनुभावात् यथावृत्तमवेत्य राजा जीमूतकेतुः राज्ञी च वध्वा मलयवत्या सह द्रुतं तत्र यावत् गन्तु प्रावर्तेतां, तावत् स शंख चूडस्तं गोकर्णशिवं प्रणम्य तत्राऽऽययौ, ददर्श च तत् शिलातलं रुधिरार्दम् । दृष्ट्वैव "हा हतोऽस्मि महापापः, ध्रुवं तेन महात्मना कृपालुना मत्कृते गरुत्मते आत्मा दत्तः, तदन्वेषामि स महात्मा शत्रुणा क्व नीतः, तच्चेत् जीवन्तमाप्नुयां तदा अयशःपङ्के न मज्जेयम्" इति उदश्रुर्वदन् स, निरन्तरं सान्द्रां पतितां रक्तधारामनुसरन् ययौ ।

अत्रान्तरे तं जीमूतवाहनं भक्षयन् गरुडस्तं हृष्टं विलोक्य व्यचिन्तयत्, —अहो ! अपूर्वः कोऽपि अयं महासत्त्वः मया भक्ष्यमाणोऽपि प्रहृष्यति न तु प्राणैर्वियुज्यते, विभर्त्ति च लुप्तशेषेऽपि गात्रे रोमाञ्चकञ्चुकम् । किञ्चास्य

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उपकारिणीव दृष्टिर्मयि प्रसीदति, तदेषः न नागः, कोऽप्येष महापुरुषः, तदेनं पृच्छामि, न पुनर्भक्षयामि"। इतं विमृशन्तं तं तार्क्ष्यं जीमूतवाहनः प्राह,—"पक्षिराज! किं निवृत्तोऽसि? अद्यपि मे देहे मांसशोणितं वर्त्तते, न च ते तृप्तिं पश्यामि, तत् पुनर्भुङ्क्ष्व"। एतदतिविचित्रमाकर्ण्य स पक्षिराट् तं पप्रच्छ,—"महात्मन्! नैव त्वं नागः, तन् ब्रूहि, को भगवान्?" इति। "नाग एवास्मि, कोऽयं ते प्रश्नः? प्रकृतमनुसर, को हि बालिशः प्रस्तुतार्थविरुद्धमाचरेत्?"।

इत्थं जीमूतवाहने तार्क्ष्यं प्रेरयति, समुपेत्य स शंखचूडः दूरात् तमुवाच,—"विनतानन्दन! मा महापापं साहसञ्च कृथाः, कोऽयं ते भ्रमः? न ह्येष नागः, नागोऽहमस्मि"। इत्युक्त्वा द्रुतमेत्य तयोर्मध्ये विभ्रान्तं तार्क्ष्यं पुनः शंखचूडोऽब्रवीत्,—"गरुत्मन्! कस्ते भ्रमः? मे फणं द्वे च जिह्वे न पश्यसि? किञ्चास्य सौम्यामाकृतिं न पश्यसि?" इत्थं शंखचूडे वदति सा भार्य्या मलयवती पितरौ च सर्वेऽत्र सत्वम् आययुः। तञ्च विलुप्ताङ्गं पुत्रं दृष्ट्वाऽस्य पितरौ—"हा पुत्र! हा जीमूतवाहन! हा कारुणिक! हा वत्स! हा परार्थप्रदत्तजीवित! हा वैनतेय! त्वया कथमिदमविमृश्य समाचरितम्?" इति विलपन्तौ भृशं रुरुदतुः। तत् श्रुत्वा तार्क्ष्यो भृशमनुतप्तो व्यचिन्तयत्,—"हा! कथं बोधिसत्त्वांशसम्भवो मया मोहात् भक्षितः? सोऽयं जीमूतवाहनः परार्थप्राणदाता, यस्य कृत्स्नेऽत्र जगति कीर्तिघोषणा भ्रामति!! तदस्मिन् मृते पापस्य मे अग्निप्रवेशनं युक्तम्, अधर्म विषवृक्षस्य स्वादु फलं किं पच्यते?" इत्येवं चिन्ताकुले तार्क्ष्ये स जीमूतवाहनः बन्धून् समागतान् दृष्ट्वा निपत्य व्रणव्यथया पञ्चत्वमवाप।

ततस्तत्र शोकधीनयोस्तत्पित्रोः 'हा हा" इति विलपतोः, शंखचूडे च आत्मानं निन्दति, सा मलयवती अश्रुगद्गदं नमो दृष्ट्वा पूर्वप्रसन्नां तां वरदां देवीमबिकामिति उपालभत,—"मातः! 'विद्याधरचक्रवर्ती ते पतिर्भविता' इत्यहं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

त्वया आदिष्टा, तन्मम भाग्येन त्वं मिथ्यावादिनी जाताऽसि" । इत्युक्तवत्यां तस्यां सा गौरी प्रत्यक्षीभूय–पुत्रि ! न मे वचो मृषा" इत्युक्त्वा कमण्डलोरमृतेन तं जीमूतवाहनं सिषेच; तेन च सः अक्षतसर्वाङ्ग पूर्वाधिकतरद्युतिर्जीवन् सद्यः समुत्तस्थौ । अथ सा देवी सर्वेषु प्रणमत्सु, उत्थितप्रणतं तं जीमूतवाहनं प्राब्रवीत्,—"पुत्र ! तुष्टास्मि ते अनेन देहदानेन, तदेषाऽहं निजेन पाणिना विद्याधरचक्रवर्तिपदे त्वामभिऽषिञ्चामि" एवं वदन्ती देवी कलसाम्बुभिः तं जीमूतवाहनमभ्यषिञ्चत् तेन न पूजिता तत्क्षणत् तिरोदधे । अस्मिंश्च समये नभसः दिव्याः कुसुमवृष्टयः पेतुः, नेदुश्च सहर्षं दिवि देवदुन्दुभयः ।

अथ गरुत्मान् विनतस्तं जीमूतवाहनमुवाच–"चक्रवर्त्तिन् ! अहं पुरुषातिशये त्वयि अतिप्रीतोऽस्मि, येन अपूर्वोदारमतिना त्वया त्रिजगत् कौतुकावहं ब्रह्माण्डभित्तिलिखितं इदं चित्रं कृतम्, तन्मामाज्ञापय, मतश्चाभिमतं वरं वृणीष्व" इतिवादिनं गरुडं स महासत्त्वः प्रावदत्,–गुरुत्मन् ! सानुतापेन त्वया पुनर्नागा न भक्ष्याः, ये च अस्थिशेषाः पूर्वं त्वया भक्षिताः, ते जीवन्तु" इति । "एवमस्तु, न भोक्ष्येऽहमतः परं नागान्" ये च प्राग्मुक्ताः, ते च जीवन्तु" इति तेन वरे दत्ते, ये नागा अस्थिशेषाः पूर्वमक्षिता ते च सर्वे सद्यः समुत्तस्थुः । ततः सर्वेषु सुरनागमुनिगणेषु सानन्देषु मिलितेषु स मलयाचलः लोकत्रयभूम्याख्यां लेभे । तस्मिंश्च काले गौर्य्याः प्रसादात् सर्वे विद्याधरेश्वराः तमद्भुतं जीमूत-वाहनोदन्तं विविदुः । ततश्च ते सर्वे समेत्य चरणावनता तं मुदितबन्धुसुहृत्समेतं गौरीस्वकरकृतमहाभिषेकं हिमाद्रिनिन्यु । तत्र गत्वा सन शजीमूतवाहनः पित्रामात्रा भार्य्यया मलयत्वया मित्रावसुना लोकोत्तरचरिते खचूडेन च समं बहुरत्नशोभितां विद्याधरचक्रवर्त्तितां भुञ्जानः सुखमध्युवास ।

—

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

५. कर्णार्जुनसङ्ग्रामः

अथ दुर्योधनः कर्णमामन्त्र्यांबभाषे—'सखेऽङ्गराज ! अध्यक्षीकृतौ हि भीष्मद्रोणौ प्रत्यहं ये न केनापि व्यपदेशेनास्मदीयानेव घातयित्वा, विवक्षितबाह्येनाडम्बरेण, यापितार्धमासौ स्वयमशाम्यताम् । न खलु परत्र बद्धपक्षो हैमस्तपन इव मन्दायमानतेजाः प्रतप्तुमीष्टे । तदास्ताम् । भवता तु मयि मदमित्रे च विभज्य संविर्धितयोः प्रीतिद्वेषपादपयोरयमेव वह्निसरः फलितुम् तस्मात्सारुतेन धनंजयेनोपधूपितान् जीवनार्थिनोऽस्माननुगृहाण । गृहाण चेदमाध्यक्ष्यम्' इति सप्रशंसं सेनाधिपत्येऽभिषिक्तवान् । तथाभिषिक्तः स सोत्साहं परवाहिनीं प्रविश्य तीक्ष्णतरं प्रहरन्, आत्मनोवैवस्तत्वं परेषां मनस्यर्थात्तीरतया ग्राहयामास । तत्र तस्य वधप्राप्तं नकुलं कुन्तीप्रतिज्ञास्मृतिः सहसाविभूर्य ररक्ष । अत्रांतरे दुर्योधनं हन्तुमुद्यतो युधिष्ठिरः 'कथं भवनार्यतमोऽपि कदर्थ इव परकीयाय स्पृहयति । भ्रमांशभूता हि धार्तराष्ट्राः । तदलमेतस्य वधेन' इति भीमेन निषिद्धो विरराम ' तावद् द्रौणिना पीड्यमाने स्वबले कुपितौ माद्रेयौ द्रौपदेयैः सह परानीकं प्रविश्य कदलीवनप्रविष्टाविव वेतण्डौ बहुशः पातयामासतुः ।

सप्तदशे दिवसे कर्णः सुयोधनं प्रोवाच 'महाराज ! प्रहरणादिना मत्तोऽविशिष्टोऽपि पार्थो विशिष्यते श्लाघ्यभूतेन सूतेन । तस्माच्छौरिकल्पं मद्राजं मम सारथिं कल्पय, आकल्पय च गाण्डीविनः शिरःखण्डेन तव केतुदण्डम् । तेन वाक्येन लब्धमनोरथ इव स मूढः सपदि शल्यमेत्य साभ्यर्थनमूचे—'मातुल ! अद्यत्वे भवान् कर्णश्च द्वावेव महाशयौ महाशयौ च मत्मानोरथकल्पद्रुमौ । अतो मन्ये युवामपि कृष्णार्जुनाविवैकरथावेव समरं निर्वहन्तौ विजयोत्तरौ भविष्यतः । तत्र चार्जुनस्य कृष्ण इव भवान् कर्णस्य सारथ्यमास्थाय, तं सर्वास्वापत्सु गोपायतु ।' तच्छ्रुत्वा स सक्रोधं प्रत्याह—'ननु भोः किमेवमनई

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मन्त्रयसे 'यन्मां कर्णादवहीनबलं तस्य नियोज्यं च चिकीर्षसि । कथं वा मूर्धावसिक्त आचिरथेर्भृत्यो भवतु । परेषु यं मम भागं कल्पयसि, अथवा सर्वानेव तव द्विषः कथाशेषान् करिष्यामि । तदलं मान्यविमाननया' इति । दुर्योधनस्तु पुनस्तं सानुनयमाह- मातुल ! भवन्तं वासुदेवसदृशं मत्वा कर्णस्य गुप्त्यर्थमर्थये, न पुनः कदर्थये । न च सूतकर्म कुर्वन्नर्वाचीन इति नियमः । श्रूयते हि त्रिपुरे संप्रहारे रुद्रस्य सारथ्यं कुर्वान्हिरण्यगर्भः । किं तस्य निकृष्टता । मा च कर्णं दौष्कुलेयं शङ्किष्ठाः । रूपमेव व्याचष्टे तस्य माहाकुलीनतां श्वैतच्छत्रिकतां च । अतो महानुभाव ! तं महाभागं विषमेषु धारयमाणो भवान् ; व्यसनार्णवे मग्नानां कुरूणां मद्रराजः कर्णधार इति कीर्तिं प्रपद्यस्व ' इति । तदनु तदनुनयेन प्रवर्णीभूतः स युधिष्ठिरवाक्यं संस्मृत्य प्रत्याह-ननु मनीषिन् ! सुविशारदा ते मनीषा, सूनृता ते भणितिः, यत्मम सारं वासुदेवस्येव निर्णीतवानसि । अतोऽप्रत्याख्येयं तेऽभ्यर्थनम् । किं तु पार्थः कृष्णस्येव हितैषिणो ममावसरेषु स्वैरालापं मर्षेण यद्यनुमन्ता कर्णस्तदा तस्य यन्ता स्याम्' इति ।

तथाभ्युपगच्छतः कर्णस्य रथ्यानां प्रग्रहान् गृह्णन् शल्यः 'अभिवानरध्वजमश्वांश्चोदय' इति तेन नुन्नस्तमूचे सूतपुत्र ! नेयं विहारसंसत् यत्र स्वैरं विकत्थमानस्त्वमप्रगल्भैर्महान्महीयसे । इदं तु पौरुषनिकषभूतं वीराशंसनं हि । यन्मन्यसेऽतिबलेन स्पर्धा आत्मन उत्कर्षायेति, तदपेशलम् । पश्य पावकेन वैरायमाणस्य पतङ्गस्य गतिम् । तस्माद् यद्यात्मनः पथ्यमिच्छसि, तज्जहिहि पार्थाभियोगमनोराज्यम् ' इति । तदनाहृत्य 'नुद नुदाश्वान् " इति वदति कर्णे, तथा कुर्वन् शल्यस्तमुवाच-भोः ! पश्य प्रथम एव विक्रमणे प्रस्खलतस्तव वाहान् । दृश्यन्ते च विपरीतान्येव निमित्तानि । अतो न प्रसीदति मे हृदयम् । यदि मद्वचनमुल्लङ्घ्य गमिष्यामि, तदा गमिष्यस्येवेति । तदनु यसत्कृत्य संग्रामभुवमवतरन् कर्णः सेनाग्रस्थानप्राक्षीद्-ब्रूत क्व तिष्ठयर्जुनः । तं ब्रुवन् पारितोषिकमादत्ता' मिति । तस्य तथा गर्जितमसहिष्णुः शल्यः कर्णमुवाच-रे राधापुत्र !

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मीष्मद्रोणादयो बहवो द्रोष्मन्तो यत्समक्षमर्जुनेन पराभूतास्तेषामेव पुरः कोऽयं वागाडम्बरः। परिहसंतित्वां वृथावाचाटोऽयमिति । त्वं तु निर्लज्जोऽसि। तदलमनया निरर्थिकयारभट्या' इति। तदमृष्यमाणः कर्णस्तमधिक्षिप्तवान्—'अरे प्रच्छन्नशत्रो! न त्वामिदं पृच्छामि। स्वाधिकाराननुरुपमपृष्टोत्तरं च जल्पदण्डयोऽसि। यदीदृशान्यक्षरमालानी पुनरपि जिह्वायां धारयासि, तदातव जिह्वामानेन कृपाणधाराजलेन संस्कर्तास्मि इति तं तर्जयामास। तत्प्रसङ्गेन कलहायमानावस्युध्तौ च तौ रथिसारथी साव्वयित्वा सुयोधनस्ताभ्यां समं समरमध्यमवततार।

तत्र शूरसेनान्पाञ्चालानन्यांश्चबहून्निहत्य युधिष्ठिरं व्यथयन्तं कर्णं विसञ्ज कुर्वन्वृकोदरस्तत्पुत्रं भानुसेनं तथा सप्त धार्तराष्ट्रांश्च निष्पिपेष। लब्धाश्वासः कर्णस्तु माद्रेयाभ्यां सह पुनर्युद्धायापतन्तं युधिष्ठरं भृशमर्दयन् प्राणसंशयं गतं तं रक्षितुकामेन शल्येनाख्यायि-'भो महावीर कर्ण! विक्रान्तस्य तव किमेभिर्वराकैः। न खलु मृगेन्द्रो गजेन्द्राद्दतेऽन्यं मृगं मृगयते। तस्मादमियुज्यस्व धार्तराष्ट्रकुलसर्वकर्षं वृकोदरम् इति।' तथेति निवृत्ते कर्णे, युदिष्ठिरो माद्रेयाभ्यां सह त्वरिततरं शिबिरं प्रविश्य श्रान्तः शय्यामधिशिश्ये।

अत्रान्तरेऽल्पावशिष्टं संशप्तकगणं निहत्य तदाहवमवभृथीकृत्य प्रतिनिवर्तमानः पार्थः संकुलयुद्धभुवि तीक्ष्णतरं प्रहस्तं कर्णं वीक्ष्य, मृदङ्गध्वजाङ्कितं युधिष्ठरस्य रथं तथा शरभहंसलक्षणौ नकुलसहदेवयो रथौ चापश्यन् शङ्कितः सत्वरं सिंहध्वजं रथमभिपत्य तत्रस्थं बलवत्प्रहरन्तं भीमं 'कास्माकं ज्येष्ठः' इति पप्रच्छ। 'नाहं जानमी' ति तेन प्रत्युक्तः ससंभ्रमं शिबिरमासाद्य तत्र तं पश्यन् हृष्टोऽर्जुनः कृष्णेन सह तस्य पादौ जग्राह। स त्वनवसरे प्रत्यागतौ सहर्षं प्रणमन्तौ च तौ कृष्णार्जुनौ दृष्ट्वा, कर्णं निहतं निश्चित्य पप्रच्छ—'वत्स गाण्डीविन्! कथं तं दुरात्मानं सूतपुत्रं न्यवधीस्तद्विस्तरेण ब्रूहि। न हि भीष्मद्रोणौ चास्य कर्णस्य कलामप्यर्हतः। महानरातिरयमस्माकम्। अद्यापि न मुञ्चति मां तद्रणजनितः कम्पः। अथवा ईषज्जयोऽयं

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गाण्डीवसहायस्य तव। तथापि महत्कौतूहलम्। तदाचक्ष्व' इति। 'आर्य! तवादर्शनजेन खेदेनात्र प्रधावितोऽस्मि, न तु रिपुमर्दनिजेन मोदेन' इति तेन प्रत्युक्ते. आ जन्मनोऽभूतपूर्वेणामर्षेण दुर्निरीक्षो राजा युधिष्ठिरस्तं विजगर्हे—धिक्त्वां गेहेक्ष्वेडिनम्; यस्त्वं पूर्वं प्रसङ्गे प्रसङ्गे कर्णं न खनिर्भेद्यमिव सावज्ञया गिरा तिरस्कृत्य, प्राप्तेऽवसरे एवं कातरोऽसि। ईदृशस्य तव किमनेन भारभूतेन गाण्डीवेन। दीयतामन्यस्मै यः कर्णं प्रतियोत्स्यते' इति। तत्क्षणं खड्गं परामृशन्नर्जुनः, 'किमर्थमस्थाने शस्त्रमन्विष्यसि' इति भगवता पृष्टः प्रत्याह—'सखे माधव! गाण्डीवमन्यस्मै देहीति यो मामधिक्षिपति, स मे बध्यः' इति ममेदमुपांशुव्रतम्, यथा तूबरशब्देनाधिक्षेपे भीमव्रतम्। शृण्वत एव तव तिरस्कृतगाण्डीवस्यास्य शिरः खड्गेनोत्कृत्य सत्यव्रतो भवितुमाशंसे' इति। भगवांस्तु तं धिक्कारपूर्वं निर्भर्त्सयामास—'आः पातकिन्! कथमादित्यमिव सर्वलोकनमस्कार्यं, मूर्तिमन्तमिव धर्माधिदेवं, समस्तकल्याणगुणनिधानं मृदुं शुचिं शान्तं सुगृहीतनामधेयं सम्राजं पितृकल्पं ज्येष्ठभ्रातरमजातशत्रुं जिघांसन्नापत्रपसे। अहो समीचीनमारब्धं त्वया। गुरुहत्याप्यवश्यं पालनीयं खल्विदं महाव्रतम्। कार्यानुरोधेन हि सत्यधर्मयोर्व्यवस्था, न पुनर्यथाश्रुतमात्रेण। अन्यथा हि महानवर्थः स्यात्। श्रूयते हि पुरा कौशिको नाम तपस्यन् कश्चिद्ब्राह्मणः प्राणभयात्स्वाश्रमे प्रलीनान् विप्रान् पृच्छद्भ्यो दस्युभ्यः, 'मया सत्यमेव वक्तव्यम्' इति निश्चित्य कथयामास। तैस्तेषु बलान्निहतेषु तत्पातकेन स तपस्वी नरकमियाय। एवं च तदिदं सत्यवचनं पीडामात्रफलकत्वेनाधर्मो बभूव। गहना हि सत्यधर्मयोर्गतिः। पश्य। पुरा कश्चिदव्याघ्रस्तीव्रेण तपसा बहून्वरानवाप्य लोकोपद्रवाय व्यजृम्भत। तेन जगतः क्षोभमाशङ्क्य विधाता तं चक्षुर्भ्यामन्धं चकार। तथापि प्रचण्डवीर्यतया भयानकं तं व्याघ्रं मारयन् कश्चिद् व्याधः सकुटुम्ब एव स्वर्गमियाय। तस्य सा हिंसा माहाजनिकतथ धर्मोबभूव। एवं स्थिते,

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

स्वबुद्धिपरिकल्पितस्य निष्प्रयोजनस्य व्रतस्यार्थे गुरुहत्यामाचरंस्त्वं कथंतरामन्धतामिस्त्रं न विशेः। तदलमनेन दुरध्यवसायेन इति।

तदाकर्ण्य संजतवेपथुः पार्थः प्रार्थयामास-'भगवन्! यथा मम सत्यव्रतत्वमार्यवधपातक निवृत्तिजोभयमपि स्यात्तथा त्वमेव संचिन्त्य विधत्स्व' इति। भोः पार्थ! न्यक्कुरु ज्येष्ठं कतिपयाक्षरैरूपालम्भवचनैः। वधादभ्यधिको हि मान्यानां तिरस्कारः। ततश्चोभयपरिहारं प्राप्स्यसि' इति तेन दर्शितोपायः स खड्गं न्यस्याग्रजं गर्हयामास-'अरे भीरो! समरात्पलायमानस्य तव कथं युधिष्ठिरता। ईदृशस्त्वं वीरगणनासु कनिष्ठकास्थं मां क्षिपन्न जिह्रेषि। यदि कदाचिद्भीमसेनो मामेवं गर्हयेत्तदा तस्य तत्क्षामं स्यात्। अरातिकुलोन्मूलनेऽलङ्कर्मीणो हि सः। त्वं पुनर्वित्तमर्जयितुं शत्रुमर्दयितुं वा अक्षामः क्षमामाभिनयन्, मद्बलार्जितानि धनानि दारांश्च कदर्थीकृत्य, महदिदमाक्षद्यूतिकं वैरं चोत्पाद्य, त्वदर्थं क्लिश्यमानानस्मानेव निन्दसि। धिक्त्वाम्' इति। एवमाधिक्षिप्य पुनः खड्गं परामृशन् सः किमन्यत्तवोपाशुव्रतम्, इति कृष्णेन पृष्टः सन् 'भगवन्! किमन्यत् अनुद्यनामानमनद्यमहिमानमार्यमेवमपोद्य, कां गतिं प्रतिपद्येय। तदद्यैव स्वशिरः संछिद्य तेन तद्दुष्कृतस्य निष्कृतिं चिकीर्षामि' इति प्रत्युत्तरयामास। कृष्णस्तु तं सावज्ञमाह—'अयि विवेकविश्रान्त! अनेन पश्चातापेनैव कृतप्रायश्चित्तोऽसि। तदलमलमन्धतयप्राप्तिहेतुभूतया आत्महत्यया' इति तं निवारयामास। तावत् 'भोः कृष्ण! श्रुतं श्रोतव्यम्। किमितः परमुत्केन। एवं विगीतकर्माहमद्यैव वनं प्रवेक्ष्यामि। कामं महात्मना भीमेन सह-महावीरोऽर्जुनः सुखं वसतु' इति सविवेदमुक्त्वोत्तिष्ठन् युधिष्ठिरः मात्कृते इदमेकमागः क्षन्तव्यम्' इति पादयोर्निपत्य याचमानेन कृष्णेनानुनीतः प्रकृतिमापद्यत।

अथ सुमनीकृतेन तेनानुज्ञातौ कृष्णार्जुनौ यावद्युद्धमुवमवतरतस्तावत्कर्णः स्वपुत्रान् सुषेणादीन्हतान्वीक्ष्य क्रुद्धो बहूनि परबलानि क्षपयामास। अत्रान्तरे भीमो दुःशासनं हठादाकृष्य भूमौ निपात्य पद्भ्यां तत्कण्ठं शिरश्चा-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

क्रम्य तिष्ठन्तुच्चैर्जगर्ज—'भोः कुरवः! किमिति सर्वेऽपि यूयमुपेक्षध्वे पाञ्चालीपराभवजनितक्रोधानलप्रमानतयातितृषितेन मया क्षतजपानाय विदीर्य-माणहृदयं युष्माकं युवराजं दुःशासनम्' इत्युद्घुष्य गदाप्रहारोद्गमितं तद्वक्षो-रुधिरं पायंपायं 'गौर्गौः' इति ननर्त। तत्क्षणं प्रचण्डतरेण विकृतेन च तदाकारेण भीतभीतेषु सर्वतः पलायितेषु बलेषु, आहरप्रहर' इत्यापतन्तो दश धार्तराष्ट्रा-स्तस्य महासाहसिकस्य प्रतापानले शलभीबभूवुः।

अथ पश्यत एव कर्णस्य तत्पुत्रं वृषसेनं निहत्य युद्धोद्यतेऽर्जुने, स्वपु-त्रवधेनोपचितक्रोधेऽरिमभियुञ्जाने च कर्णे, दिवि युद्धदिदृक्षयागता देवा अर्जुनतः, आदित्याः कर्णतश्चाभवन्। तत्र च 'जयतु पार्थः' इति कर्णः' इति च विवदमानौ तत्पितरावेन्द्रविकर्तनौ सान्त्वयन् पितामहः, 'अस्मिन् संपरायेऽ-र्जुनस्य जयोऽस्तु कर्णस्तु सांपरायिकं जयमप्रतिबन्धेन लभताम्' इति व्यवस्थापया-मास। तौ कर्णार्जुनावुभावपि लघुहस्ततया कृतहस्ततया चानिमिषैरप्यनव-गाह्यप्रयोगान्तरौ प्रतिक्षणमनिलमयमचलमयमनलमयमभ्रमय मन्यंचास्त्रशस्त्रकलापं विसृजन्तौ सृजन्तौ च तेजोमयं तिमिरमयं शीतमयमशीतमयं च भुवनतलं, चिरमप्यविश्रान्तावयुध्येताम्।

अत्रान्तरे पूर्वं खण्डववने पार्थेन हतजननीकशिछन्नबालश्च संस्तस्मि-न्नबद्धवैरः समयाकाङ्क्षी च स्थितस्तक्षकपुत्रोऽश्वसेनो नामोरगः स्वयं योगबलेन कर्णस्य शरे प्रविवेश। तदविद्वान् कर्णस्तं शरं प्रयुञ्जानस्तद्विदा शल्येन निषिद्धोऽपि वचनादृत्य पार्थाय प्रयुयुजे। देवराजस्तु 'धिक्परस्यार्थे स्वजनाय द्रुह्यन्तम्। यदयं दुरात्माश्वसेनो यस्मान्मया प्रयत्नाद्रक्षितस्तमेव ममात्मजं जिघांसति' इति प्रव्यथितो बभूव। तावत्सारथिना विश्वंभरेण स्वपदाङ्गुष्ट-निष्पीडिते किष्कुमात्रं भुवि मग्ने तद्रथे, शिरो लक्ष्यीकृत्य प्रयुक्तं तदस्त्रं किरीटिनः किरीटमच्छिद्यापयातम्। तेन विषण्णस्ताक्षकिः कर्णे स्ववृत्ता-न्तमावेद्य, अभिहृदयं पुनः प्रयोगाय तं चोदयामास। 'कथमेकमस्त्रं द्विः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्रयुञ्जीत कर्णः। कथं च वा पराश्रयेण स्वस्मिन्मिथ्यागौरवितो भवतु। त्वद्दृतेऽपि शक्त एवाहमर्जुनं हन्तुम्। तद्गम्यताम्' इति तेन प्रत्याख्यातः सोऽश्वसेनः स्वयमेवपार्थं जिघांसुरभिपतन्, ग्रीवां खण्डयता तेन स्वमातुः पदवीं निन्ये।

अनन्तरं प्रयुयुक्षिते ब्रह्मास्त्रोऽप्रतिभाते, भुवि मग्ने च स्यन्दने, संभ्रान्तस्तूर्णं स्यादवतीर्णः कर्णः, भोः पार्थ! क्षणं विश्राम्यतु भवान्, यावदहं रथं समेऽवस्थापयामि। न खलु वीरा विशस्त्रं कार्यान्तर व्यग्रं वा शरस्य शल्यं कुर्युः' इति प्रोवाचा। अहो 'विषमस्थः सर्वोऽपि धर्मं पश्यति, न सुखस्थः। किमयं धर्मो द्यूतकालेऽनेन नाधीतः। किं विलम्बसे। हन्यतामयं दुरात्माद्युनैव' इति कृष्णेन नुन्नोऽर्जुनो दिव्यास्त्रेण भूमिष्टमेव तं वीरप्रकाण्डं वीरशय्यायां शाययतिस्म। तस्य कर्णस्य शरीरोत्थं दिव्यं ज्योतिः पश्यतामेव सर्वेषां ज्योतिर्मालिनो मण्डलमा विवेश।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

६. विश्रुत चरितम्

अथ सोऽप्याचचक्षे–'देव, मयापि परिभ्रमता विन्ध्याटव्यां कोऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लैशार्हः क्वचित्कूपाभ्याशेऽष्टवर्षदेशीयो दृष्टः। स च त्रासगद्गदमगदत्—'महाभाग, क्लिष्टस्य मे क्रियतामार्य, साहाय्यकम्। अस्य मे प्राणापहारिणीं पिपासां प्रतिकर्तुमुदकमुदञ्चन्निह कूपे कोऽपि निष्कलो ममैकशरणभूतः पतितः। तमलमस्मि नाहमुद्धर्तुम्' इति। अथाहमभ्येत्य व्रतत्या कयापि वृद्धमुत्तार्य, तं च बालं वंशनालीमुखोद्धृताभिरद्भिः फलैश्च पञ्चभिः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपातितैः प्रत्यानीतप्राणवृत्तिमापाद्य, तरुतलनिषण्णस्तं जरन्तमब्रवम्—'तात, क एष बालः, को वा भवान्, कथं चेयमापदापन्ना' इति। सोऽश्रुगद्गदमगदत्—'श्रूयतां महाभाग, विदर्भो नाम जनपदः तस्मिन्भोज, वंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्त्वः, सत्यवादी, वदान्यः विनीतः विनेता प्रजानाम्, रञ्जितभृत्यः, कीर्तिमान्, उदग्रः, बुद्धिमूर्तिभ्यामुत्थानशीलः, शास्त्रप्रमाणकः, शक्यभव्यकल्पारम्भी, संभावयिता बुधान्, प्रभावयिता सेवकान्, उद्भावयिता बन्धून्, न्यग्भावयिता शत्रून्, असंबद्धप्रलापेष्वदत्तकर्णः, कदाचिदप्यवितुष्णो गुणेषु, अतिनदीष्णः कलासु, नेदिष्ठो धर्मार्थसहितासु, स्वल्पेऽपि सुकृते सुतरां प्रत्युपकर्ता, प्रत्यवेक्षिता कोशवाहनयोः, यत्नेन परीक्षिता सर्वाध्यक्षाणाम् उत्साहयिता कृतकर्मणामनुरूपैर्दानमानैः, सद्यः प्रतिकर्ता दैवमानुषीणामापदाम्, षाड्गुण्योपयोगनिपुणः, मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य, पुण्यश्लोकः पुण्यवर्मा नामासीत्। स पुण्यैः कर्मभिः प्राप्य पुरुषायुषम्, पुनरपुण्येन प्रजानामगण्यतामरेषु। तदनन्तर–मनन्तवर्मा नाम तदायतिरवनिमध्यतिष्ठत्। स सर्वगुणैः समृद्धोऽपि दैवाद्दण्डनीत्यां नात्यद्दतोऽभूत्। तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भवागभाषत—'तात, सर्वेवात्मसंपदभिजनात्प्रभृत्यन्यूनैवात्रभवतो लक्ष्यते। बुद्धिश्च निसर्गपट्वी कलासु नृत्यगीतादिषु चित्रेषु च काव्यविस्तरेषु

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

प्राप्तविस्तरा तवेतरेभ्यः प्रतिविशिष्यते । तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेषु, अनग्निसंशोधितेव हेमजातिर्नातिभाति बुद्धिः बुद्धिहीनो हि भूभृदत्युच्छ्रितोऽपि परैरभ्यारुह्यमाणमात्मानं न चेतयते । न च शक्तः साध्यं साधनं वा विभज्य वर्तितुम् । अयथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते । न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय । अतिक्रान्तशासनाश्च प्रजा यत्किंचनवादिन्यो यथाकथंचिद्वर्तिन्यः सर्वाः स्थितीः संकिरेयुः । निर्मर्यादश्च लोको लोकादितोऽमुतश्च स्वामिनमात्मानं च भ्रंशयते । आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा । दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहितविप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति । तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात् । अतो विहाय बाह्यविद्यास्वभिषङ्गमागमय दण्डनीतिं कुलविद्याम् । तदर्थानुष्ठानेन चावर्जितशक्तिसिद्धिरस्खलितशासनः शाधि चिरमुदधिमेखलामुर्वीम्' इति । एतदाकर्ण्य 'स्थान एव गुरुभिरनुशिष्टम् । तथा क्रियते' इत्यन्तःपुरमविशत् । तां च वार्तां पार्थिवेन प्रमदासंनिधौ प्रसङ्गेनोदीरितमामुपनिशम्य समीपेपविष्टश्चित्तानुवृत्तिकुशलः प्रसादवित्तो गीतनृत्यवाद्यादिष्वबाह्यो बाह्यनारीपरायणः पटुरयन्त्रितमुखो बहुभङ्गिविशारदः परमर्मान्वेषणपरः परिहासयिता परिवादरुचिः पैशुन्यपण्डितः सचिवमण्डलादप्युत्कोचहारी सकलदुर्नयोपाध्यायः कामतन्त्रकर्णधारः कुमारसेवको विहारभद्रो नाम स्मितपूर्वं व्यज्ञपयत—'देव, दैवानुग्रहेण यदि कश्चिद्राजनं भवति विभूतेः, तमकस्मादुच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्ताः । तथाहि । केचित्प्रेत्य किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य, मुण्डयित्वा शिरः, बद्ध्वा दर्भरज्जुभिः, अजिनेनाच्छाद्य, नवनीतेनोपलिप्य, अनशनं च शयित्वा, सर्वस्वं स्वीकरिष्यन्ति । तेभ्योऽपि घोरतराः पाषण्डिनः पुत्रदारशरीरजीवितान्यपि मोचयन्ति । यदि कश्चित्पटुजातीयो नास्यै मृगतृष्णिकायै हस्तगतं त्युक्तुमिच्छेत् । तमन्ये परिवार्याहुः—'एकामपि काकिणीं कर्षापणलक्षमापादयेम, शस्त्रादृते सर्वशत्रून्घातयेम, एकशरीरिणमपि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मर्त्यं चक्रवर्तिनं विदधीमहि, यद्यस्मदुद्दिष्टेन मार्गेणाचर्यते' इति । स पुनरिमान्प्रत्याह—'कोऽसौ मार्गः' इति । पुनरिमे ब्रुवते—'ननु चतस्रो राजविद्यास्त्रयी वार्तान्वीक्षिकी दण्डनीतिरिति । तासु तिस्रस्त्रयीवार्तान्वीक्षिक्यो महत्यो मन्दफलाश्च, तास्तावदासताम् । अधीष्व तावद्दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थं षड्भिः श्लोकसहस्रैः संक्षिप्ता । सवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा' इति । स 'तथा' इत्यधीते । शृणोति च । तत्रैव जरां गच्छति । तत्तु किल शास्त्रं शास्त्रान्तरानुबन्धि । सर्वमेव वाङ्मयमविदित्वा न तत्त्वतोऽधिगंस्यते । भवतु कालेन बहुनाल्पेन वा तदर्थाधिगतिः । अधिगतशास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम् । आत्मकुक्षेरपि कृते तण्डुलैरियद्भिरियानोदनः संपद्यते । इयत ओदनस्य पाकायैतावदिन्धनं पर्याप्तमिति मानोन्मानपूर्वकं देयम् । उत्थितेन च राज्ञा क्षालिताक्षालिते मुखे मुष्टिमर्धमुष्टिं वाभ्यन्तरीकृत्य कृत्स्नमायव्ययजातमहः प्रथमेऽष्टमे वा भागे श्रोतव्यम् । शृण्वत एवास्य द्विगुणमपहरन्ति तेऽध्यक्षधूर्ताश्चत्वारिंशतं चाणक्योपदिष्टानाहरणोपायान्सहस्रधात्मबुद्ध्यैव ते विकल्पयितारः । द्वितीयेऽन्योन्यं विवदमानानां जनानामाक्रोशाद्दह्यमानकर्णः कष्टं जीवति । तत्रापि प्राड्विवाकादयः स्वेच्छया जयपराजयौ विदधानाः, पापेनाकीर्त्या च भर्तारमात्मनश्चार्थैर्योजयन्ति । तृतीये स्नातुं भोक्तुं च लभते । भुक्तस्य यावदन्धः परिणामस्तावदस्य विषभयं न शाम्यत्येव । चतुर्थे हिरण्यप्रतिग्रहाय हस्तं प्रसारयन्नेवोत्तिष्ठति । पञ्चमे मन्त्रचिन्तया महान्तमायासमनुभवति । तत्रापि मन्त्रिणो मध्यस्था इवान्योन्यं मिथः संभूय, दोषगुणौ दूतचारवाक्यानि शक्याशक्यतां देशकालकार्यावस्थाश्च स्वेच्छया विपरिवर्तयन्तः, स्वपरमित्रमण्डलाप्युपजीवन्ति । बाह्याभ्यन्तरांश्च कोपान्गूढमुत्पाद्य प्रकाशं प्रशमयन्त इव स्वामिनमवशमवगृह्णन्ति । षष्ठे स्वैरविहारो मन्त्रो वा सेव्यः ॥ सोऽस्यैतावान्स्वैरविहारकालो यस्य तिस्रस्त्रिपादोत्तरा नाडिकाः । सप्तमे चतुरङ्गबलप्रत्ययेक्षणप्रयासः । अष्टमेऽस्य सेनापतिसखस्य विक्रमचिन्ताक्लेशः । पुनरुपास्यैव संध्याम् . प्रथमे रात्रिभागे गूढपुरुषा द्रष्टव्याः । तन्मुखेन चातिनृशंसाः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

शस्त्राग्निरसप्राणिघयोऽनुष्ठेयाः। द्वितीये भोजनानन्तरं श्रोत्रिय इव स्वाध्यायमारभेत। तृतीयेतूर्यघोषेण संविष्टश्चतुर्थपञ्चमौ शयीत किल। कथमिवास्याजस्रचिन्तायासाविह्वलमनसो वराकस्य निद्रासुखमुपनमेत। पुनः षष्ठे शास्त्रचिन्ताकार्यचिन्तारम्भः। सप्तमे तु मन्त्रग्रहो दूतामिप्रेषणानि च। दूताश्च नामोभयत्र प्रियाख्यानलब्धानर्थान्वीतशुल्कबाधवर्त्मनि वाणिज्यया वर्धयन्तः, कार्यमविद्यमानमपि लेशेनोत्पाद्यानवरतं भ्रमन्ति। अष्टमे पुरोहितादयोऽभ्येत्यैनमाहुः — 'अद्य दृष्टो दुःखप्नः। दुःस्था ग्रहाः शकुनानि चाशुभानि। शान्तयः क्रियन्ताम्। सर्वमस्तु सौवर्णमेव होमसाधनम्। एवं सति कर्म गुणवद्भवति। ब्रह्मकल्पा इमे ब्राह्मणाः। कृतमेभिः स्वस्त्ययनं कल्याणतरं भवति। ते चना कष्टदारिद्र्या बह्वपत्या यज्वानो वीर्यवन्तश्चाद्याप्यप्राप्तप्रतिग्रहाः। दत्तं चैभ्यः स्वर्गमायुष्यमरिष्टनाशनं च भवति' इति बहु बहु दापयित्वा तन्मुखेन स्वयमुपांशु भक्षयन्ति। तदेवमहर्निशमविहितसुखलेशमायासबहुलमविरलकदर्थनं च नयतोऽनयज्ञस्यास्तां चक्रवर्तिता, स्वमण्डलमात्रमपि दुरारक्ष्यं भवेत्। शास्त्रज्ञसमाज्ञातो हि यद्ददाति, यन्मानयति, यत्प्रियं ब्रवीति, तत्सर्वमतिसंधातुमित्यविश्वासः अविश्वस्यता हि जन्मभूमिरलक्ष्म्याः। यावता च नयेन विना न लोकयात्रा स लोकं एव सिद्धः नात्र शास्त्रेणार्थः। स्तनंघयोऽपि हि तैस्तैरुपायैः स्तनपानं जनन्या लिप्सते तदपास्यातियंत्रणामनुभूयन्तां यथेष्टमिन्द्रियसुखानि। येऽप्युपदिशन्ति 'एवमिन्द्रियाणि जेतव्यानि, एवमरिषड्वर्गस्त्याज्यः, सामादिरुपायवर्गः स्वेषु परेषु चाजस्त्रं प्रयोज्यः, संधिविग्रहचिन्तयैव नेयः कालः, स्वल्पोऽपि सुखस्यावकाशो न देश्य' इति, तैरप्येभिर्मन्त्रिबकैर्युष्मत्तश्चौर्यार्जितं धनं दासीगृहेष्वेव भुज्यते। के चैते वराकाः। येऽपि मन्त्रकर्कशास्तन्त्रकर्तारः शुक्राङ्गिरसविशालाक्षबाहुदन्तिपुत्रपराशरप्रभृतयस्तैःकिमरिड्वर्गो जितः, कृतं वा तैः शास्त्रानुष्ठानम्। तैरपि हि प्रारब्धेषु कार्येषु दृष्टे सिद्धयसिद्धी पठन्तश्चापठद्भिरतिसंधीयमाना बहवः। नन्विदमुपपन्नं देवस्य, यदुत सर्वलोकस्य वन्द्या जत्तिः, आयातयामं वयः, दर्शनीयं वपुः, अपरिमाणा विभूतिः। तत्स्र सर्वाविश्वासहेतुना सुखोपभोगप्रतिबन्धिना बहुमार्गविकल्पनात्सर्वकार्येष्वमुक्त-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

संशयेन तन्त्रावापेन मा कृथा वृथा । सन्ति हि ते दन्तिनां दश सहस्त्राणि, हयानां लक्षत्रयम्, अनन्तं च पादातम् । अपि च पूर्णान्येव हैमरत्नैः कोशगृहाणि । सर्वश्चैष जीवलोकः समग्रमपि युगसहस्त्रं भुञ्जानो न ते कोष्ठागारणि रेचयिष्यति । किमिदमपर्याप्तं यदन्यार्जितायासः . क्रियते । जीवितं हि नाम जन्मवतां चतुःपञ्चाप्यहानि । तत्रापि भोगयोग्यमल्पाल्पं वयःखण्डम् । अपण्डिताः पुनर्जयन्त एव ध्वंसन्ते । नार्जितस्य वस्तुनो लवमप्यास्वादयितुमीहन्ते । किं बहुना राज्यभारं भारक्षमेष्वन्तरङ्गेषु भक्तिमत्सु समर्प्य, अप्सरःप्रतिरूपाभिरन्तःपुरिकामी रममाणो . गीतसंगीतपानगोष्ठीश्च यथर्तु बध्नन्यथार्हं कुरु शरीरलाभम्' इति पञ्चाङ्गीमृष्टभूमिञ्जलिबुम्बितचूडश्चिरमशेत । प्राहसीच्च प्रीतिफुल्ललोचनोऽन्तःपुरप्रमदाजनः जननाथश्च सस्मितम्—'उत्तिष्ठ, ननु हितोपदेशाद्गुरवो भवन्तः । किमिति गुरुत्वविपरीतमनुष्ठितम्' इति तमुत्थाप्य क्रीडानिर्भरमतिष्ठत् । अथैषु दिनेषु भूयोभूयः प्रस्तुतेऽर्थे प्रेर्यमाणो मन्त्रिवृद्धेन वचसाभ्युपेत्य मनसैवाचित्तज्ञ इत्यवज्ञातवान् । अथैवं मन्त्रिणो मनस्यभूत्—'अहो मे मोहाद्वालिश्यम् । अरुचितेऽर्थे चोदयन्नर्थावाक्षिगतोऽहमस्य हास्यो जातः । स्पृष्टमस्य चेष्टानामायथापूर्व्यम् । तथा हि । न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति, न व्यसनेष्वनुकम्पते, नोत्सवेष्वनुगृह्णाति, न विलोभनवस्तु प्रेषयति, न मत्सुकृतानि प्रगणयति, न मे गृहवार्तां पृच्छति, न मत्पक्षान्प्रत्यवेक्षते, न मामासन्नकार्येष्वभ्यन्तरीकरोति, न मामन्तःपुरं प्रवेशयति । अपि च मामन्तर्हेषु कर्मसु नियुङ्क्ते, मदासनमन्यैरवष्टभ्यमानमनुजानाति, मद्वैरिषु विश्रम्भं दर्शयति, मदुक्तस्योत्तरं न ददाति, मत्समानदोषान्विगर्हति, मर्मणि मामुपहसति, स्वमतमपि मया वर्ण्यमानं प्रतिक्षिपति, महार्हाणि वस्तूनि मत्प्रहितानि नाभिनन्दति, नयज्ञानां स्खलितानि मत्समक्षं मूर्खैरुद्घोषयति । सत्यमाह चाणक्यः—'चित्तज्ञाननुवर्तिनोऽनर्था अपि प्रियाः स्युः । दक्षिणा अपि तद्भावबहिष्कृता द्वेष्या भवेयुः' इति । तथापि का गतिः । अवनीतोऽपि न परित्याज्यः पितृपैतामहैरस्मादृशैरयमधिपतिः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अपरित्यजन्तोऽपि कमुपकारमश्रूयमाणवाचः कुर्मः। सर्वथा नयज्ञस्य वसन्त भानोरश्मकेन्द्रस्य हस्ते राज्यमिदं पतितम्। अपि नामापदो भाविन्यः प्रकृति स्थमेनमापादयेयुः। अनर्थेषु सुलभव्यलीकेषु क्वचिदुत्पन्नोऽपि द्वेषः सद्वृत्तमस्मै न रोचयेत्। भवतु भविता तावदनर्थः। स्तम्भितपिशुनजिह्वो यथाकथं-चिदभ्रष्टपदस्तिष्ठेयम्' इति। एवं गते मन्त्रिणि, राजनि च कामवृत्ते, चन्द्र-पालितो नामाश्वकेन्द्रामात्यस्येन्द्रपालितस्य सूनुः असद्वृत्तः पितृनिर्वासितो नाम भूत्वा, बहुभिश्चारणगणैर्वह्वीभिरनल्पकौशलाभिः शिल्पकारिणीभिरनेकच्छन्न-किंकरैश्च गूढपुरुषैः परिवृतोऽभ्येत्य विविधाभिः क्रीडाभिर्विहारभद्रमात्मसाद-करोत्। अमुना चैव संक्रमेण राजन्यास्पदमलभत। लब्धरन्ध्रश्च स यद्यद्व्यसनमारभते तत्तथेत्यवर्णयत्—'देव, यथा मृगया ह्यौपकारिकी न तथान्यत्। अत्र हि व्यायामोत्कर्षादापत्सूपकर्ता दीर्घाध्वलङ्घनक्षमो जङ्घाजवः कफापचया-दारोग्यैकमूलमाशयाग्निदीप्तिः मेदोपकर्षादङ्गानां स्थैर्यकार्कश्यातिलाघवादीनि; शीतोष्णवातवर्षक्षुत्पिपासासहत्वम्, सत्त्वानामवस्थान्तरेषु चित्तचेष्टितज्ञानम्, हरिणगवलगवयादिवधेन सस्यलोपप्रतिक्रिया वृकव्याघ्रादिघातेन स्थलपथ-शल्यशोधनम् शैलाटवीप्रदेशानां विविधकर्मक्षमाणामालोचनम्, आटविकवर्गविश्र-म्भणम्, उत्साहशक्तिसंधुक्षणेन प्रत्यनीकवित्रासनमिति बहुतमा गुणाः। द्यूतेऽपि-द्रव्यराशेस्तृणवत्त्यागादनुपमानमाशयौदार्यम्, जयपराजयानवस्थानाद्धर्षविषादयोर विधेयत्वम्, पौरुषैकनिमित्तस्यामर्षस्य वृद्धिः अक्षहस्तभूम्यादिगोचराणामत्यन्तदुरु-पलक्ष्याणां कूटकर्मणामुपलक्षणादनन्तबुद्धिनैपुण्यम्, एकविषयोपसंहाराच्चित्तस्याति-चित्रमैकाग्र्यम्, अध्यवसायसहचरेषु साहसेष्वरतिः अतिकर्कशपुरुषप्रतिसंसर्गादनन्य-धर्षणीयता, मानावधारणम्, अकृपणं च शरीरयापनमिति। उत्तमाङ्गनोपभोगेऽप्य-र्थधर्मयोः सफलीकरणम्, पुष्कलः पुरुषाभिमानः भावज्ञानकौशलम्, अलोभक्लि-ष्टमाचेष्टितम्, अखिलासु कलासु वैचक्षण्यम्, अलब्धोपलब्धि लब्धानुरक्षणरक्षितो-पभोगभुक्तानुसंधानरुष्टानुनयादिष्वजस्त्रमभ्युपायरचनया बुद्धिवाचोः पाटवम्, उत्कृष्ट-शरीरसंस्कारात्सुभगवेषतया लोकसंभावनीयतया परं सुहृत्प्रियत्वम्, गरीयसी परिजन-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

व्यपेक्षा, स्मितपूर्वाभिभाषित्वम्, उद्रिक्तसत्त्वता, दाक्षिण्यानुवर्तनम्। अपत्योत्पादनेनोभयलोकश्रेयस्करत्वमिति। पानेऽपि नानाविधरागभङ्गपटीयसामासवानामासेवनात्स्पृहणीयवयोव्यवस्थापनम् अहंकारप्रकर्षादशेषदुःखतिरस्करणम्, अङ्गजरागदीपनादङ्गनोपभोगशक्तिसंबुक्षणम्, अपराधप्रमार्जनान्मनःशल्योन्मार्जनम्, अश्राव्यशंसिभिरनर्गलाप्रपौर्विश्वासोपबृंहणम्, मत्सराननुबन्धादानन्दैकतानता, शब्दादीनामिन्द्रियार्थानां सातत्येनानुभवः, संविभागशीलतया सुहृद्वर्गसंवर्गणम्, अनुपमानमङ्गलावण्यम्, अनुत्तराणि विलसितानि, भयार्तिहरणाच्च साङ्ग्रामिकत्वमिति। वाक्पारुष्यं दण्डो दारुणो दूषणानि चार्थानामेव यथावकाशमौपकारिकाणि। नहि मुनिरव नरपतिरुपशमरतिरभिभवितुमरिकुलमलम्, अवलम्बितुं च लोकतन्त्रम् इति। असावपि गुरूपदे शमिवात्यादरेण तस्य मतमन्वर्तवत। तच्छीलानुसारिण्यश्च प्रकृतयो विशृङ्खलमसेवन्त व्यसनानि। सर्वश्च समानदोषतया न कस्यचिच्छिद्रान्वेषणायायतिष्ट। समानभर्तृप्रकृतयस्तन्त्राध्यक्षाः स्वानिकर्मफलान्यभक्षयन्। ततः क्रमादायद्वाराणि व्यशीर्यन्त। व्ययमुखानि विटवैधेयतया विभोरहरहर्व्यवर्धन्त। सामन्तपौरजानपदमुख्याश्च समानशीलतयोपारूढविश्रम्भेण राज्ञा संजायाः पानगोष्ठीष्वभ्यन्तरीकृताः स्वं स्वमाचारमत्यचारिषुः। तदङ्गनासु चानेकापदेशपूर्वमपाचरन्नरेन्द्रः। तदन्तःपुरेषु चामी भिन्न वृत्तेषु मन्दत्रासा बहुसुखैरवर्तन्त। सर्वश्च कुलाङ्गनाजनः सुलभभङ्गिभाषणरतो भग्नचारित्रयन्त्रणस्तृणायापि न गणयित्वा भर्तॄन्धातृगणमन्त्रणान्यशृणोत्। तन्मूलाश्चः कलहाः सामर्षाणामुदभवन् अहन्यन्त दुर्बला बलिभिः। अपहृतानि धनवतां धनानि तस्करादिभिः अपहृतपरिभूतयः प्रहताश्च पातकपथाः। हृतबान्धवा हृतवित्ता वधबन्धातुराश्च मुक्तकण्ठमाक्रोशन्नश्रुकण्ठ्यः प्रजाः। दण्डश्चायथाप्रणीतो भयक्रोधावजनयत्। कृशकुटुम्बेषु लोभः पदमधत्त। विमानिताश्च तेजस्विनेऽमानेनादह्यन्त। तेषु तेषु चाकृत्येषु प्रासरन्परोपजापाः। तदा च मृगयुवेषमृगबाहुल्यवर्णनेनाद्विद्रेणीरनपसारमार्गाः शुष्कतृणवंशगुल्माः प्रवेश्य द्वारतोऽग्निविसर्गैः, व्याघ्रापिवधे प्रोत्साह्य तन्मुखपातनैः, इष्टकूपतृष्णोत्पादनेनातिदूर हारितानां प्राणहारिभिः क्षुत्पिपासाभिवर्धनैः

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तृणगुल्मगूढच्छन्नतटप्रदरघातहेतुभिर्विषममार्गप्रधावनैः, विषमुखीभिः क्षुरिकाभिश्च रणकण्टकोद्धरणैः, विप्वंग्विसरविच्छिन्नानुयातृतयैकाकीकृतानां यथेष्टघातैनैः, मृगदेहापराद्धैर्नामेषुमोक्षणैः, सपणवन्धमधिरुह्य द्विश्रृङ्गाणि दुरधिरोहाण्यनन्यलक्ष्यैः प्रभ्रंशनैः आटविकच्छद्मना विपिनेषु विरलसैनिकानां प्रतिरोधनैः,अक्षद्यूतपक्षियुद्धयात्रोत्सवादिसंकुलेषु बलवदनुप्रवेशनैः, इतरेषां हिंसोत्पादनैः, गूढोत्पादितव्यलीकेभ्योऽप्रियानि प्रकाशं लब्ध्वा साक्षिषु तद्विरुद्धाप्याकीर्तिगुप्तिहेतुभिः पराक्रमैः, परकलत्रेषु सुहृत्त्वेनाभियोज्य जारान्भर्तृनुभयं वा प्रहृत्य तत्साहसोपन्यासैः, योग्यनारीहारितानां संकेतेषु प्रागुपनिलीय पश्चादभिद्रुत्याकीर्तनीयैः प्रमापणैः, उपप्रलोभ्य विलप्रवेशेषु निधानखननेषु मन्त्रसाधनेषु च विघ्नव्याजसार्थेर्व्यापादनैः, मत्तगजाधिरोहणाय प्रेर्य प्रत्यपायनिवर्तनैः, व्यालहस्तिनं कोपयित्वा लक्ष्यीकृतमुख्यमण्डलेष्वक्रमपणैः, दायाद्यर्थे विवदमानानुपांशु हत्वा प्रतिपक्षेष्वयशःपातनैः, सामन्तपुरजनपदेष्वयथावृत्तानप्रकाशमभिप्रहृत्य तद्वैरिनामघोषणैः, योग्याङ्गनाभिरहर्निशमभिरमय्य राजयक्ष्मोत्पादनैः, वस्त्राभरणमाल्याङ्गरागादिषु रसविधानकौशलैः, चिकित्सामुखेनामयोपवर्हणैरन्यैश्चभ्युपायैरश्मकेन्द्रप्रयुक्तास्तीक्ष्णरसेन्द्रादयः प्रक्षपितप्रवीरमनन्तवर्मकटकं जर्जरमकुर्वन् । अथ वसन्तभानुवर्माणं नाम वानवास्यं प्रोत्साह्यानन्तवर्मणा व्याग्राहयत् । तत्परामृष्टराष्ट्रपर्यन्तश्चानन्तवर्मा तमभियोक्तुं बलसमुत्थानमकरोत् । सर्वसामन्तेभ्यश्चाश्मकेन्द्रः प्रागुपेत्यास्य प्रियतरोऽभूत् । अपरेऽपि सामन्ताः समगंसत । मत्वा चाभ्यर्णे नर्मदारोधसि न्यविशन् । तैस्सिश्चावसरे महासामन्तस्य कुन्तलपतेरवन्तिदेवस्यात्मनाटकीयां क्ष्मातलोर्वशीं नाम चन्द्रपालितादिभिरतिप्रशस्तनृत्यकौशलामाहूयानन्तवर्मा नृत्यमद्राक्षीत् । अतिरक्तश्च भुक्तवानिमां मंधुमत्ताम् । अश्मकेन्द्रस्तु कुन्तलपतिमेकान्ते समभ्यधत्त—'प्रमत्त एव राजा कलत्राणि नः परामृशति । कियत्यवज्ञा सोढव्या । मम शतमस्ति हस्तिनाम् , पञ्चशतानि च ते । तदावां संभूय मुरलेशं वीरसेनमृचीकेशमेकवीरं कोङ्कणपतिं कुमारगुप्तं सासिक्यनाथं च नागपालमुपजपाव । ते चावश्यमस्याविनयमसहमाना । अस्मन्मतेनैवोपावर्तेरन् । अयं च वानवास्यः प्रियं मे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मित्रम् । अमुनैनं दुर्विनीतमग्रतो व्यतिषक्तं पृष्ठतः प्राहरेम । कोशवाहनं च विभज्य गृह्णीमः' इति हृष्टेन चामुनाभ्युपेते, विंशतिं वरांशुकानाम्, पञ्चविंशतिं वाञ्चनकुङ्कुमकंम्बलानाम् । प्राभृतीकृत्याप्तमुखेन तैः सामन्तैः संमन्त्रय तानपि स्वमतावस्थापयत् । उत्तरेद्युस्तेषां सामान्तानां वानवास्यश्च आनन्तवर्मा नवद्वेषादामिषत्वमगतत् । वसन्तभानुश्च तत्कोशवाहनमवशीर्णमात्माधिष्ठितमेव कृत्वा यथाप्रयातं यथाबलं च विभज्य गृह्णीत । युष्मदनुज्ञया येनकेनचिदंशेनाहं तुष्यामि' इति शाठ्यात्सर्वानुवर्तिं, तेनैवामिषेण निमित्तीकृतेनोत्पादितकलहः सर्वसामन्तानध्वंसयत् तदीयं च सर्वस्वं स्वयमेवाग्रसत् । वानवास्यं केनचिदंशेनानुगृह्य प्रत्यावृत्य सर्वमनन्तवर्मराज्यमात्मसादकरोत् । अस्मिंश्चान्तरे मन्त्रिवृद्धो वसुरक्षितः कैश्चिन्मौलेः संभूय बालमेनं भास्करवर्माणम्, अस्यैव ज्यायसीं भगिनीं त्रयोदशवर्षां मञ्जुवादिनीम्, अनयोश्च मातरं महादेवीं वसुंधरामादायापासर्पन्नापदोऽस्या भावितया दाहज्वरेण देहमजहात् । अस्मादृशैर्मित्रैस्तु नीत्वा माहिष्मतीं भर्तृद्वैमातुराय भ्रात्रे मित्रवर्मणे सापत्या देवी दर्शिताभूत् । तां चार्यामनार्योऽसावन्यथाभ्यमन्यत । निर्भार्त्सितश्च तया 'सुतमियमखण्डचारित्रा राज्यार्हं चिकीर्षति' इति नैर्घृण्यात्तमेनं बालमजिघांसीत् । इदं तु ज्ञात्वा देव्याहमाज्ञप्तः—'तात, नालीजङ्घ, जीवतानेनार्भकेण यत्र क्वचिदवधाय जीव । जीवेयं चेदहमप्येनमनुसरिष्यामि । ज्ञापय मां क्षेमप्रवृत्तः स्ववार्ताम्' इति । अहं तु संकुले राजकुले कथंचिदेनं निर्गमय्य विन्ध्याटवीं व्यगाहिषि । पादचारिणं चैनमाश्वासयितुं घोषे क्वचिदहानि कानिचिद्विश्रमय्य, तत्रापि राजपुरुषसंपातभीतो दूराध्वमपासरम् । तत्रास्य दारुणपिपासापीडितस्य वारि दातुकामः कूपेऽसिन्नपश्रय पतितस्त्वयैवमनुगृहीतः । त्वमेवास्यातः । शरणमेधि विशरणस्य राजसूनोः' इत्यञ्जलिमबध्नात् । 'किमीया जात्यास्य माता' इत्यनुयुक्ते मयामुनोक्तम्—'पाटलिपुत्रस्य वाणिजो वैश्रवणस्य दुहितरि सागरदत्तायां कोसलेन्द्रात्कुसुमधन्वनोऽस्य माता जाता' इति । यद्येवमेतन्मातुर्मत्पितुश्चैको मातामहः' इति सखेहं तमहं सस्वजे । वृद्धेनोक्तम्—'सिन्धुदत्तपुत्राणां कतमस्ते पिता' इति

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

'सुश्रुतः' इत्युक्ते सोऽप्यहृष्यत्। अहं तु 'तं नयावलिप्तमश्मकनयेनैवोन्मूल्य बालमेनं पित्र्ये पदे प्रतिष्ठापयेयम्' इति प्रतिज्ञाय 'कथामस्यैनां क्षुधं क्षपयेयम्' इत्यचिन्तयम्। तावदापतितौ च कस्यापि व्याधस्य त्रीनिषूनतीत्य द्वौ मृगौ स च व्याधः। तस्य हस्तादवशिष्टमिषुद्वयं कोदण्डं चाक्षिप्यावधिषम्। एकश्च सपत्राकृतोऽन्यश्च निष्पत्राकृतोऽपतत्। तं चैकं मृगं दत्त्वामृगयवे, अन्यस्याप-लोमत्वचः क्लामापोह्य, निष्कुशकृत्य विकृत्योर्वङ्घिग्रीवादीनि शूलाकृत्य दावाङ्गारेषु तप्तेनामिषेण तयोरात्मनश्च क्षुधमतार्षम्। एतस्मिन्कर्मणि मत्सौष्ठवेनातिहृष्टं किरातमस्मि पृष्टवान् – अपि जानासि माहिष्मतीवृत्तान्तम्' इति। असावचष्ट — 'तत्र व्याघ्रत्वचो हृतीश्च विक्रीयाद्यैवागतः किं न जानामि। प्रचण्डवर्मा नाम चण्डवर्मानुजो मित्रवर्मदुहितरं मञ्जुवादिनीं विलिप्सुरभ्येतीति तेनोत्सवोत्तरा पुरी, इति। अथ कर्णे जीर्णमब्रवम् —'धूर्तो मित्रवर्मा दुहितरि सम्यक्प्रतिपत्त्य मातरं विश्वास्य तन्मुखेन प्रत्यक्कृष्य बालकं जिघांसति। तत्प्रतिगत्य कुशलमस्था मद्वार्तां च देव्यै रहो निवेद्य पुनः कुमारः शार्दूलभक्षित इति प्रकाशमाक्रोशनं कार्यम्। स दुर्मतिरन्तःप्रीतो बहिर्दुःखं दर्शयन्देवीमनुनेष्यति। पुनस्तया' त्वन्मुखेन स वाच्यः—'यदपेक्षया त्वन्मतमत्यक्रमिषं सोऽपि बालः पापेन मे परलोकमगात्। अद्य तु त्वदादेशकारिण्येवाहम्' इति। स तथोक्तः प्रीतिं प्रतिपद्यामिपत्स्यति। पुनरनेन वत्सनाभनाम्ना महाविषेण संनीर्य तोये तत्र मालां मज्जयित्वा तया स वक्षसि मुखे च हन्तव्यः। 'स एवायमसिप्रहारः पापीयसस्तव भवतु यद्यस्मि पतिव्रता'। पुनरनेनागदेन संगमितेऽम्भसि तां मालां मज्जयित्वा स्वदुहित्रे देया। मृते-तु तस्मिंस्तस्यां च निर्विकारायां सत्याम्, सतीत्येवैनां प्रकृतयोऽनुवर्तिष्यन्ते। पुनः प्रचण्डवर्मणे संदेश्यम् — 'अनायकमिदं राज्यम्। अनेनैव सह बालिकेयं स्वकर्तव्या' इति। तावदावां कापालिकवेनच्छन्नौ देव्यैव दीयमानभिक्षौ पुरो बहिरुपश्मशानं वत्स्यावः। पुनरार्यप्रायान्पौरवृद्धानासांश्च मन्त्रिवृद्धानेकान्ते ब्रवीतु देवी—'स्वप्नेऽद्य मे देव्या विन्ध्यवासिन्या कृतः प्रसादः। अद्य चतुर्थेऽहनि प्रचण्डवर्मा मरिष्यति।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

पञ्चमेऽहनि रेवातटवर्तिनि मद्भवने परीक्ष्य वैजन्यम्, जनेषु निर्गतेषु कपाटमुद्घाट्य त्वत्सुतेन सह कोऽपि द्विजकुमारो निर्यास्यति । स राज्यमिदमनुपाल्य बालं ते प्रतिष्ठापयिष्यति । स खलु बालो मया व्याघ्रीरूपया तिरस्कृत्य स्थापितः। सा चेयं वत्सा मञ्जुवादिनी तस्य द्विजातिदारकस्य दारत्वेनैव कल्पिता' इति । 'तदेतदति-रहस्यं युष्मास्वेव गुप्तं तिष्ठतु यावदेतदुपपत्स्यते इति । स सांप्रतमतिप्रीतः प्रयातोऽर्थश्चायं यथाचिन्तितमनुष्ठितोऽभूत् । प्रतिदिशं च लोकवादः प्रासर्पत्- 'अहो माहात्म्यं पतिव्रतानाम् । असिप्रहार एव हि स मालाप्रहारस्तस्मै जातः । न शक्यमुपधियुक्तमेतत्कर्मेति वक्तुम् । यतस्तदेव दत्तं दाम दुहित्रे स्तनमण्डनमेव तस्यै जातं न मृत्युः । योऽस्याः पतिव्रतायाः शासनमतिवर्तते स भस्मैव भवेत् इति ।

अथ महाव्रतिवेषेण मां च पुत्रं च भिक्षायै प्रविष्टौ दृष्ट्वा प्रस्नुतस्तनी प्रत्युत्थाय हर्षाकुलमब्रवीत्—भगवन्, अयमञ्जलिः । अनायोऽयं जनोऽनुगृह्यतम अस्ति ममैकः स्वप्नः स किं सत्यो न वा' इति । मयोक्तम्—'फलमस्याद्यैव द्रक्ष्यसि' इति । 'यद्येवं बहु भागधेयमस्या वो दास्याः । स खल्वस्याः सानाय्यशंसी स्वप्नः' इति मद्दर्शनरागबद्धसाध्वसां मञ्जुवादिनीं प्रणमय्य, भूयोऽपि सा हर्षगर्भमब्रूत—'तच्चेन्मिथ्या सोऽयं युष्मदीयो बालकपाली श्वो मया निरोद्धव्यः' इति । मयापि सस्मितं मञ्जुवादिनीरागलीनदृष्टिलीढधैर्येण 'एवमस्तु' इति लब्धमैक्ष्यः, नालीजङ्घमकार्यं निर्गम्य ततश्च तं चानुयान्तं शनैर-पृच्छम् 'कासावल्पायुः प्रथितः प्रचण्डवर्मा' इति । सोऽब्रूत—'राज्यमिदं ममेत्यपास्तशङ्को राजास्थानमण्डप एव तिष्ठत्युपास्यमानः कुशीलवैः' इति । 'यद्येव-मुद्याने तिष्ठ' इति तं जरन्तमादिश्य तत्प्राकारैकपार्श्वे क्वचिच्छून्यमठिकायां मात्राः समवतार्य तद्रक्षणनियुक्तराजपुत्रः, कृतकुशीलववेषलीलः प्रचण्डवर्माणमेत्यान्वरञ्जयम् । अनुरञ्जितातपे तु समये, जनसमाजज्ञानोपयोगीनि संहृत्य नृत्यगीतनानारुदितादिहस्त-चङ्क्रमणमूर्ध्वपादालातपादपीठवृश्चिकमकरलङ्घनादीनि मत्स्योद्वर्तनादीनि च करणानि, पुनरादायादायासन्नवर्तिनां क्षुरिकाः तामिरुपाहितवर्ष्मा चित्रदुष्कराणि करणानि

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्येनपातोत्क्रोशपातादीनि दर्शयन्, विंशतिचापान्तरालावस्थितस्य प्रचण्डवर्मणश्छुरिकयकया प्रत्युरसं प्रहृत्य, 'जीव्याद्वर्षसहस्रं वसन्तभानुः' इत्यभिगर्जन्, मद्गात्रमरूकर्तुद्यतासेः कस्यापि चारभटस्य पीवरांसबाहुशिखरमाक्रम्य, तावतैव तं विचेतीकुर्वन्, आकुलं च लोकमुच्चक्षूकुर्वन्, द्विपुरुषोच्छ्रितं प्राकारमत्यलङ्घयम्। अवलुप्त्य चोपवने 'मदनुपातिनामेष पन्था दृश्यते' इति ब्रुवाण एव नालीजङ्घसमीकृतसैकतास्पृष्टपादन्यासया तमालवीथ्या चानुप्राकारं प्राचा प्रतिप्रधावितः; पुनरवाचोचितेष्टकचितत्वादलक्ष्यपातेन प्रद्रुत्य लङ्घितप्राकारवप्रखातवलयः, तस्यां शून्यमठिकायां तूर्णमेव प्रविश्य, प्रतिमुक्तपूर्ववेषः सह कुमारेण मत्कर्म तुमुलराजद्वारदुःखलब्धवर्त्मा श्मशानोद्देशमभ्यगाम्। प्रागेव तस्मिन्दुर्गागृहे प्रतिमाधिष्ठान एव मया कृतं भग्नदार्श्वस्थैर्यस्थूलप्रस्तरस्थगितबाह्यद्वारं बिलम्।

अथ गलति मध्यरात्रे वर्षवरोपनीतमहार्हरत्नभूषणपट्टनिवसनौ तद्बिलमावां प्रविश्य तूष्णीमतिष्ठाव। देवी तु पूर्वेद्युरेव यथार्हमभिलतस्कारं मालवाय दत्त्वा प्रचण्डवर्मणे चण्डवर्मणे च तामवस्थामश्मकेन्द्रोपधिकृतामेव संदिश्य, उत्तरेद्युः प्रत्युषस्येव पूर्वसंकेतितपौरामात्यसामन्तवृद्धैः सह्याभ्येत्य भगवतीमर्चयित्वा समर्चनप्रत्यक्षं परीक्षितकुक्षिवैजन्यं तद्भवनं विधाय दत्तदृष्टिः सह जनेन स्थित्वा, पटीयांसं पटहशब्दमकारयत्। अणुतरन्ध्रप्रविष्टेन तेन नादेनाहं दत्तसंज्ञः शिरसैवोत्क्षिप्य सप्रतिमं लोहपादपीठमंसलपुष्पप्रयत्नदुश्चलमुभयकरविधृतमेकपार्श्वमेकतो निवेश्य निरगमम्। निरगमयं च कुमारम्। अथ यथापूर्वमर्चयित्वा दुर्गामुद्घाटितकपाटः प्रत्यक्षीभूय प्रत्ययहृष्टदृष्टिः स्पष्टरोमाञ्चमुद्यताञ्जलिरूढविस्मयं च प्रणिपतन्तीः प्रकृतीरभ्यधाम्—'इत्थं देवी विन्ध्यवासिनी मन्मुखेन युष्मानाज्ञापयति—'मया सकृपया शार्दूलरूपेण तिरस्कृत्याद्य वो दत्तमेनमद्यप्रभृति मत्पुत्रतया मन्दमातृपक्ष इति परिगृह्णन्तु भवन्तः। अपि च दुर्घटकूटकोटिघटनापाटवप्रकटशाठ्यनिष्ठुराश्मकघटघट्टनात्मानं मां मन्यध्वमस्य रक्षितारम्। रक्षानिर्वेशश्चास्य स्वसेयं सुभ्रूरभ्यनुज्ञाता मद्यमार्यया' इति। श्रुत्वैतत् 'अहो भाग्यवान्भोजवंशः, यस्य त्वमार्यादत्तो नाथः' इत्यप्रीयन्त प्रकृतयः। सा तु वाचामगोचरां हर्षावस्थामस्पृशन्मे

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

श्वश्रूः। तदहरेव च यथावदग्राहयन्मञ्जुवादिनीपाणिपल्लवम्। प्रपन्नायां च यामिन्यां सम्यगेव बिलं प्रत्यपूरयम्। अलब्धरन्ध्रश्च लोको नष्टमुष्टिचिन्तादिकथनैरभ्युपायान्तरप्रयुक्तैर्दिव्यांशतामेव मम समर्थयमानः, मदाज्ञां नात्यवर्तत। राजपुत्रस्यार्यापुत्र इति प्रभावहेतुः प्रसिद्धिरासीत्। तं च गुणवत्यहनि भद्राकृतमुपनाय्य पुरोहितेन पाठयन्नीतिं राजकार्याण्यन्वतिष्ठम्। अचिन्तयं च —'राज्यं नाम शक्तित्रयायत्तम्, शक्तयश्च मन्त्रप्रभावोत्साहाः परस्परानुगृहीताः कृत्येषु क्रमन्ते। मन्त्रेण हि विनिश्चयोऽर्थानाम्, प्रभावेण प्रारम्भः, उत्साहेन निर्वहणम्। अतः पञ्चाङ्गमन्त्रमूलः, द्विरूपप्रभावस्कन्धः, चतुर्गुणोत्साहविटपः, द्विसप्ततिप्रकृतिपत्रः, षड्गुणकिसलयः, शक्तिसिद्धिपुष्पफलश्च, नयवनस्पतिर्नेतुरुपकरोति। स चायमनेकाधिकरणत्वादसहायेन दुरुपजीव्यः। यस्त्वयमार्यकेतुर्नाम मित्रवर्ममन्त्री स कोसलाभिजनत्वात्कुमारमातृपक्षो मन्त्रिगुणैश्च युक्ततन्मतिमवत्यैव ध्वस्तो मित्रवर्मा, स चेल्लब्धः पेशलम्' इति। अथ नालिजङ्घं रहस्यशिक्षयम् — 'तात, आर्यमार्यकेतुमेकान्ते ब्रूहि—'को न्वेष मायापुरुषो य इमां राज्यलक्ष्मीमनुभवति, स चायमस्मद्बालो भुजङ्गेनामुना परिगृहीतः। किमुदीर्यत ग्रस्येत वा' इति। स यद्वदिष्यति तदस्मि बोध्यः' इति। सोऽन्यदैवं मामावेदयत्—'मुहुरुपास्य प्राभृतैः प्रवर्त्य चित्राः कथाः, संवाह्य पाणिपदम्, अतिविस्रम्भदत्त-भक्षणं तमप्राक्षं त्वदुपदिष्टेन नयेन। सोऽप्येवमकथयत्— भद्र, मैवं वादीः। अभिजनस्य शुद्धिदर्शनम् असाधारणं बुद्धिनैपुणम्, अतिमानुषं प्राणबलम्, अपरिमाणमौदार्यम्, अत्याश्चर्यमन्त्रकौशलम्, अनल्पं शिल्पज्ञानम्, अनुग्रहार्द्रं चेतः, तेजश्चाप्यविषह्यमभ्यमित्रीणम्, इत्यस्मिन्नेव संनिपातिनो गुणाः येऽन्यत्रैकैकशोऽपि दुर्लभाः। द्विषतामेष चिरबिल्वद्रुमः प्रह्वाणां तु चन्दनतरुः, तमुद्धृत्य नीतिज्ञमन्यश्मकमिमं च राजपुत्रं पित्र्ये पदे प्रतिष्ठितमेव विद्धि। नात्र संशयः कार्यः' इति। तच्चापि श्रुत्वा भूयोभूयश्चोपदाभिर्विशोध्य तं मे मति-सहायमकरवम्। तत्सखश्च सत्यशौचयुक्तानमात्यान्विविधव्यञ्जनांश्च गूढपुरुषानुदपादयम्। तेभ्यश्चोपलभ्य लुब्धसमृद्धमत्युत्सिक्तमविधेयप्रायं च प्रकृतिमण्डल

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मलुब्धतामभिख्यापयन्, धार्मिकत्वमुद्भावयन्, नास्तिकान्कदर्थयन्, कण्टकान्विशोधयन्, अमित्रोपघीरपघ्नन् चातुर्वर्ण्यं च स्वधर्मकर्मसु स्थापयन्, अभि समाहरेयमर्थामूला हि दण्डविशिष्टकर्मारम्भा न चान्यदस्ति पापिष्ठं तत्र दौर्बल्यात्, इत्याकलय्य योगानन्वतिष्ठम् ।।

इति श्रीदण्डिनः कृतौ दशकुमारचरिते विश्रुतचरितं नामाष्टम उच्छ्वासः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कविः कृतिश्च

1. " स्वर्गङ्गा भुवमागता "

इयं कथा पि. वि. काणे महाशयेन गद्यरूपेणष् सङ्गृहीतात् " संस्कृत गद्यावलिः नाम्नः ग्रन्थात् उद्धृता । अस्याः मूलंतु तु वाल्मिकि रामायणम् । संस्कृत-वाङ्मये महाकविः वाल्मीकिः केन वा न विदितोऽस्ति ? अयं तपोधनः, विदितसकलवेदशास्त्रार्थतत्त्वश्च । २४ सहस्रश्लोक सम्मितं रामायणाभिधानं महाकाव्यं विरच्य भुवि अनितरसुलभं आदिकविरित्यभिधानमयं लेभे । अत एव इदंकाव्यमपि आदिकाव्यमिति प्रथितमभूत् । तीव्रे तपसि स्थितयेनं वल्मीकः आवृत्य समभूत् ; तस्माच्च संभूतोऽयं वाल्मीकिरित्यन्वर्थं नाम आप्नोत् ।

अस्य जीवित काल विषये नैकोभिर्विप्रायः अस्ति; केचनसांप्रदायिका एनं त्रेतायुगवर्तिनमावुः । आधुनिका विमर्शका क्रि. पू० ४००–२०० वर्षवर्तिनं अभिप्रयन्ति ।

ಕಠಿಣ ಪದಗಳ ಅರ್ಥ

दृढधत्वा—ಗಟ್ಟಿಯಾದ ಬಿಲ್ಲುಳ್ಳವನು

कापिलं—ಕಪಿಲಮುನಿಗೆ ಸಂಬಂಧಿಸಿದ

रसातलं—ಪಾತಾಳಲೋಕ

खनित्रं—ಗುದ್ದಲಿ

जलक्रिया—ಸತ್ತವರಿಗೆ ಬಿಡುವ 'ತರ್ಪಣ' ಎಂಬುದು

(2) (3) वीरोचितमुपायनं, करुणालयो जीमूतवाहनश्च

इमौ द्वावपि प्रबन्धौ " वेतालपञ्च विंशति " रिति प्रथितात् ग्रन्थात् उद्धृतौ । तत्र ग्रन्थे पञ्चविंशति कथाः गद्यरूपेण संङ्गृहीताः सन्ति । अस्य आकरो ग्रन्थस्तु गुणाढ्यकवेः बृहत् कथा' नामको ग्रन्थः । अयं पैशाच भाषयां रचितः । फ्रेंच्, जर्मन् आदि भाषासु अयं ग्रन्थः कृतानुवादः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

एष कविः युविख्यातनाम्नः सातवाहनस्य राज्ञः आस्थाने राजतेस्म। क्रि. शकस्य प्रथमशतके च अस्य जीवितम्। अयमभिप्रायः सोमदेवभट्टकृतायां: "कथासरित्सागर' ग्रन्थपीठिकायां प्रकाशितः। गुणाढ्यस्य पिता कीर्तिसेनः माता च श्रुतार्थेति वेतालकाव्याविशतिं ग्रन्थस्या. २५ कथा अपि क्षेमेन्द्रकवेः वृह-त्कथामंञ्जरी नामके, सोमदेवभट्टस्य कथासरित्सागर" नामके पद्यकाव्य-प्रबन्धेचनिबद्धाः सन्ति। अनयोः जीवित कालः क्रि-श० ११ शतकम्"

वेतालपञ्चविंशति नामकस्य गद्यप्रबन्धस्य कर्ता तावत् पण्डितः जीवानन्द विद्यासागर भट्टाचार्यः।

ಕಠಿಣಪದಗಳ ಅರ್ಥ

आखेटक—ಬೇಟೆ.

लगुडः—ದೊಣ್ಣೆ.

विपर्य्याणीकृतं—ಥಡಿಯನ್ನು ಕಳಚಿದ.

आमलकं—ನೆಲ್ಲಿಕಾಯಿ.

निष्कृतिः—ಬಿಡುಗಡೆ.

पोतः—ದೋಣಿ.

जाम्बूनदः—ಚಿನ್ನ.

अब्रह्मण्यम् ಬೊಬ್ಬೆಯಿಡು.

निस्त्रिंशः—ಕತ್ತಿ.

यादः ಜಲಜಂತು.

प्राज्यं—ಹೆಚ್ಚು.

गृहपरिच्छदः—ಮನೆಯಸರಿವಾರ.

दीनारः—ನಾಣ್ಯ.

करवालः—ಕತ್ತಿ.

वसुधा—ಭೂಮಿ.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

उपहारः—ಕಾಣಿಕೆ.

कङ्कालिनि— ಎಲುಬುಗಳನ್ನು ಧರಿಸಿರುವವಳು.

उत्तमाङ्गम्— ತಲೆ.

अवदातम्—ನಿರ್ಮಲವಾದ.

4. स्वामिभक्तिः

वीरवरस्य इयं कथा श्री पि. वि. काणे महाशयस्य "संस्कृत गद्यावलिः" ग्रन्थात् उद्धृता। एष च "कथासरित्सागर" ग्रन्थात् सङ्गृहीता। अस्य कर्ता सोमदेवभट्टश्च अनन्तराजस्यास्थाने पण्डित इति ज्ञायते। अस्य पिता रामभट्टः। | अयं क्रि. श. 11 शत के बभूवेति विमर्शका अभिप्रयन्ति"

ಕಠಿಣ ಪದಗಳ ಅರ್ಥ

सानोरूपरि—सानुः—ತಪ್ಪಲು

विहस्तता—ವ್ಯಾಕುಲತೆ

तार्क्ष्यमातरं—ಗರುಡನತಾಯಿಯಾದ

नागराट्—ನಾಗರಾಜ

क्लीबः—ಷಂಡ, ಅಂಜುಬುರುಕ

छन्नः—ಮರೆಮಾಡಿಕೊಂಡ

अभाग्यायाः—ದುರ್ಭಾಗ್ಯಶಾಲಿಯಾದ

पश्चिमः प्रणामः—ಕಡೆಯ ನಮಸ್ಕಾರ

असृग्भिरूक्षितः—ರಕ್ತಸಿಕ್ತವಾದ

मृषा—ಸುಳ್ಳು

5. कर्णार्जुन संग्रामः

महर्षिपराशर महाभारतं लक्षश्लोकात्मकं व्यरचि प्रायः क्रि. पू. ४ शतके महाभारतं रचितमितिविमर्शका अभि प्रयान्ति। समुद्र इवागाधा अष्टादश पर्व

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विभक्ता महाभारती कथा वर्तते । अयं वाल्मीकिरामायणाख्यो ग्रन्थश्च भारतीया नामतीव पवित्रो विराजेते । विश्वसाहित्य भाण्डागारे एतद्ग्रन्थ द्वयसदृशा विस्तृतो ग्रन्थः नैवोपलभ्यते ।

महाभारतीया कथा गद्यरूपेण 'महाभारतसंग्रह नाम्ना ग्रन्थेन कृतसंक्षेपा अमुं संग्रहग्रन्थं तमिळुनाडु प्रान्तीयतिरुनेन्नवेलि अभिजनः महापण्डितः लक्ष्मण सूरिनामा कविः अकर्षित् । अस्य जीवनकालश्च क्रि. श. 1859–1919

प्रस्तुतः कर्णार्जुनसग्रामः इत्ययं भागः प्रागुक्तात् 'महाभारतसंग्राम ग्रन्थात् उद्धृतो । अस्मिन्ग्रन्थे अतिविस्तृतायाः महाभारतकथायाः यथा वैकल्यं भवेत्तथा कवि कृतयत्नो दृश्यते । अत्र भाषाशैली यद्यपि सरलानास्ति । तथापि व्युत्पित्सूनां अतीवोपयोगिनी चकास्ति ।

ಕಠಿಣ ಪದಗಳ ಅರ್ಥ

हैमः तपनः—ಹಿಮಾಲಯದಸೂರ್ಯ.

समारूतेन—ಭೀಮನೊಡಗೂಡಿದ.

परवाहिनीं—ಶತ್ರುಸೇನೆಯನ್ನು

वैरस्वतत्वं—ಸೂರ್ಯನ ಮಗನೆಂಬುದನ್ನು.

कदर्यः—ಜಿಪುಣ.

वेतण्डौ—ಎರಡು ಆನೆಗಳು.

नियोज्यः—ಸೇವಕ.

दौष्कुलेयः—ನೀಚಕುಲದಲ್ಲಿ ಹುಟ್ಟಿದವನು.

अस्युद्यतौ—ಎತ್ತಿದ ಕತ್ತಿಯುಳ್ಳ.

सर्वंकषः—ನಿರ್ನಾಮ ಮಾಡುವ.

गेहेक्ष्वेडिनम् ಮನೆಯಲ್ಲಿ ಮಾತ್ರ ಗರ್ಜಿಸುವವನು.

अनुद्यनामानं—ಪೂಜ್ಯನಾದ.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

विगीतं—ನಿಂದ್ಯ.

आग—ಅಪರಾಧ.

विकर्तनः—ಸೂರ್ಯ.

सम्परायः—ಯುದ್ಧ.

किष्कुः—ಗೇಣು.

6. विश्रुतचरितम्

अयं भागः महाकवेः दण्डिनः "दशकुमार चरित" ग्रन्थात् उद्धृतः ।। अयं कविः "आचार्य दण्डी" इत्यपि अभिधीयते अनेन 'अवन्तिसुन्दरी कथा इति अन्यत् गद्यकाव्यं तथा "काव्यादर्श' इति अलङ्कारशास्त्रग्रन्थश्च विरचिता । अस्यकालः कि. श. ७ शतकमिति विमर्शका अभिप्रयन्ति "महाकाव्यस्य" किरातार्जुनीयस्यकर्ता भारविः दण्डिनः प्रपितामहः ।

संस्कृतवाङ्मये गद्यकाव्यानि प्रविरलानि सन्ति । पद्यकाव्यापेक्षया गद्य-काव्यनिर्मितिः अतिकठिना; अत एव 'गद्यं कवीनां निकषं वदन्ति" इति सूक्तिः प्रचलितास्ति ' हर्षचरितकादम्बरी गद्ययोः कर्ता बाणः, वासवदत्ताकर्ता सुबन्धुः तथा दण्डी एते त्रयोऽपि संस्कृतगद्यसाहित्यपारावारे रत्नत्रयमिति महतीमाख्यां भजन्ति । एताः कृतयोऽपि तथैव सुप्रख्याताः सन्ति ।

ಕಠಿಣ ಪದಗಳ ಅರ್ಥ

निष्कलः—ಮುದುಕ.

ततिः—ಬಳ್ಳಿ.

वदान्यः—ಬಹಳದಾನಮಾಡುವವನು.

उदग्रः— ದೊಡ್ಡತನವುಳ್ಳವನು, ಉನ್ನತ ಶರೀರ ಉಳ್ಳವನು.

नदीष्ण—ಕುಶಲ.

नेदिष्ठः—ಹತ್ತಿರದಲ್ಲಿರುವವನು.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ಪುರುಷಾಯುಷಮ್—ಪೂರ್ಣವಯಸ್ಸು.

ಉಚ್ಛ್ರಿತ—ಉನ್ನತ.

ಪ್ರಸಾದವಿತ್ತಃ—ರಾಜನ ಅನುಗ್ರಹಕ್ಕೆ ಪಾತ್ರನೆಂದು ಪ್ರಸಿದ್ಧನಾದ.

ಅಯಾತಯಾಮಮ್—ಮುಪ್ಪಡರದ, ಮುಪ್ಪಿಲ್ಲದ.

ತನ್ತ್ರಾವಾಪಃ—ತನ್ತ್ರಂ=ತನ್ನ ರಾಜ್ಯದ ಚಿಂತನೆ. ಆವಾಪಃ=ಶತ್ರು ರಾಜ್ಯದ ಚಿಂತನೆ.

ಅನ್ನಃ—ಅನ್ನ.

ಅಕ್ಷಿಗತಃ—ದ್ವೇಷಿಸುವ.

ಗಲ್ಲಃ—ಕಾಡು ಕೋಣ.

ಘಾತುಗಣಃ—ಜಾರರು

ಉಪಜಾಪಃ—ಒಡಕು.

ಕ್ಲೋಮ—ಮೆದುಳು.

ನಿಷ್ಕುಲಾಕೃತ್ಯ—ಅವಯವಗಳನ್ನು ಬಿಡಿಸಿ.

ಕುಶೀಲವಃ—ರಾಜನನ್ನು ಹೊಗಳುವವರು, ಹೊಗಳು ಭಟರು.

—

S. Narayanan
I year P.U.C. "B" Section
Government Junior Collage
Nagamangala Mandgadi

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

Prescribed as a Non-Detailed Text Book for the P. U. C. I year class by the Board of Pre-University Education, Govt. of Karnataka for the year 1981-82 as per their letter No. TXB. CR. 1/81-82 Dated 8-4-1981.

S. Narayanan.

ಸ್ವರ್ಣಮಧು

ಸಂಸ್ಕೃತದ ಅವಿಸ್ತಾರ ಪಠ್ಯ ಪುಸ್ತಕ

ಮೊದಲನೆಯ ತರಗತಿ—ಪದವಿ-ಪೂರ್ವ ಶಿಕ್ಷಣ

ಬೆಲೆ. ರೂ. 1=20 ಪೈಸೆ.

S. Narayanan
I P.U.C. Sy Section
Government Pu. College
Nagamangala
Narayanan MK/KOR

BALA SAHITYA BHANDARA
No. 2, K. V. Lane, Cottonpet, Bangalore-53.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.